अथ कृग्रहणं किमर्थं · इह माभूत् · बिभिदिव बिभिदिमेति · नैतदस्ति प्रयोजनं · कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि इति सेत्तस्मान्नियमादत्रेड्भवि
ष्यति · नानेनेन परिभाषणं प्राप्नोति · किं कारणं · प्रकृतिलक्षणस्य प्रतिषेधस्य संप्रसारणं नः प्रत्ययलक्षणश्चायं प्रतिषेधः । उभयोः
संप्रसारणं नः । कथं ज्ञायते ष्टुञ्वृञोर्ग्रहणात् · कथं कृत्वा ज्ञापकं · इमौ ष्टुञ्वृञावुदात्तौ तयोः प्रकृतिलक्षणः प्रतिषेधो न प्राप्नोति · प
श्यति त्वाचार्यः उभयोः संप्रसारणं न इति ततो ष्टुञ्वृञोर्ग्रहणं करोति · किं च न खल्वपि कश्चिदुभयवान्प्रकृतिलक्षणः प्रत्ययलक्षणश्च
न तः किं तुल्यजातीये प्रसक्ते यथैव प्रकृतिलक्षणस्य नियामको भवत्येवं प्रत्ययलक्षणस्यापि नियामको भविष्यति · इदं तर्हि प्र

नस्यसह किलारवशादित्वाच्चेट्प्रतिषेधाप्राप्तिः । नैतदस्ति · ववर्थेति निगम इति निपातनं क्रियमाणं भाषायां ववरिथेतीदमभ्यनुजानाति · स्यादेतत् · तुल्यजातीय एव प्रतिषे
धो नियमेन बाध्यतां एकेकाश्रयस्तु कथं बाध्यत इत्याशंक्याह · न खल्वपीति · कृसृभृवृस्तुद्रुस्रुश्रुभ्यो लिटि प्रकृत्याश्रय एवैकाच उपदेशेऽनुदात्तादितीट्प्रतिषेधः प्राप्नोति केवलाचः प्र
कृतेः शब्देनोपादानात् · अथोच्येत च कृत्प्रत्ययस्तारोऽश्रुकः किती तीट्प्रतिषेधः प्राप्नोति स चोभयवान्प्रकृतिप्रत्ययविशेषाश्रयणादिति तत्र · अत्रापि न तरंगत्वात्प्रकृत्याश्रय
एव प्रतिषेधस्तस्यैव नियमे विज्ञायमाने वृग्रहणमनर्थकं स्यात्तस्मात्प्रत्ययाश्रयोऽपि प्रतिषेधो नियम्यत इत्यत्र च वृग्रहणं लिंगं प्रकृत तत्कृत्यपेक्षायां च न खल्वपीत्युच्यते न त

= श्र्युकः किती तस्मोऽभयवतः सतोऽन खल्वपीत्युक्तमत आह प्रकृतेति · ९ =

मा॰ कौ॰
३३

रुदिवः रुदिम इति॰ अस्मतिरुद्ग्रहणे रुदादिभ्यः सार्वधातुकइत्यस्य टोत्र प्रतिषेधः स्यात्॰ तस्मात्त्ववशादिरनकाशोरोदितीत्यादौ॰ यदेतदिति॰ प्रतिषेधप्रकरणमित्यर्थः। ततः सार्वधातुके इट्
प्रतिषेधाभावः। यद्यन्यार्थमार्द्धधातुकग्रहणं कर्त्तव्यं तदा योगविभागेन साध्यते यदा तत्स्यात्प्रयोजनाभावः तदा लाघवार्थं रुद्ग्रहणमेव कर्त्तव्यं प्रत्याख्यास्यते च तत्रार्द्धधातुकग्रहणं॰ न
स्मेति॰ नन्वत्रैव वक्ष्यसुणादय इति न तत्राप्युत्तराश्रयणं देवेत्यत्र विष्यति॰ अन्येभ्योपि दृश्यत इत्यनेनात्र मनिन्प्रत्यय इत्यदोषः॥ ॥तितुत्र॰॥ निकुचितिरिति॰ कुचेः क्तिन्नादिभ्य इति

रुदिवः रुदिमः। एतदपि नास्ति प्रयोजनं उपरिष्टाद्योगविभागः करिष्यते॰ आर्द्धधातुकस्य॰ यदेतदनुक्रान्तं तदार्द्धधातुकस्येड्वक्ष्यं॰ ततः इड्वलादेरिति
तत्रत्वेनावद्रष्टव्यं॰ यदि किंचित्तत्रान्यदप्यार्द्धधातुकग्रहणस्य प्रयोजनमस्ति अथ न किंचित् इहवा रुद्ग्रहणं क्रियते तत्र वार्द्धधातुकग्रहणं क्रियते को
न्वत्र विशेषः। नेड्रमनादौ कृति॰ वरमनादौ कृतीट्प्रतिषेधं प्रयोजयति॰ ईशिता ईशितुं ईश्वरः। व॰ र॰ दीपिता दीपितुं दीप्रः। रं॰ म॰ भसिता भसितुं भ
स्म॰ म॰ न॰ यतिता यतितुं यत्नः। अथान्येये वशादयस्तत्र कथं॰ उणादयो व्युत्पन्नानि प्रातिपदिकानि॰॥ ॥तितुत्रथसि॰॥ ॥तितुत्रेष्वग्रहादीनांति
तुत्रेष्वग्रहादीनामिति वक्तव्यं॰ निगृहीतिः उपस्निहितिः निकुचितिः परिपठितिः॥ ॥एकाच उपदेशेनुदात्तात्॰॥ ॥एकाज्ग्रहणं किमर्थं॰ एकाज्
ग्रहणं जागर्त्यर्थं॰ एकाज्ग्रहणं क्रियते [redacted] जागर्तेरिट्प्रतिषेधो मा भूत्॰ जागरिता जाग [redacted] रितुं॰ नैतदस्ति प्रयो
जनं॰ उपदेशेनुदात्तादित्युच्यते जागर्तिश्चोपदेशे उदात्तः। न ब्रूमः इहार्थं जागर्त्यर्थमेकाज्ग्रहणं कर्त्तव्यमिति किं तर्ह्युत्तरार्थं श्युकः किति तीट्प्रतिषेधं व
क्ष्यति स जागर्तेर्मा भूत् जागरितः [redacted] जागरितवानिति॰ एतदपि नास्ति प्रयोजनं जागर्तेर्गुण उच्यते वृद्धिविषये प्रतिषेधविषये च॰

क्तिन्॰ कुचशब्देनात्र इत्यस्माद्धात्वर्थयां क्तिन्॥ ॥एकाच उप॰॥ ॥एकाज्ग्रहणमिति॰ एकाचामेवानुदात्तत्वप्रतिज्ञानादनुदात्तग्रहणेनैवातिप्रसंगनिवारणात्प्रश्नः। इत्तं उत्तरार्थ
तमभिप्रेत्याह॰ एकाज्ग्रहणं जागर्त्यर्थमिति॰ स जागर्तेर्मा भूदिति॰ जागर्तेरनेकाच्त्वात् नेकाच्त्वं भवतीति तन्निवृत्त्यर्थमेकाज्ग्रहणं कृतेनेत्यनुवृत्त्याभावात्प्रतिषेधो भवत्येव॰ चोदकः प्र

शिवः
३३

प्रष्टावसरत्वाद् प्रतिषेधम्

सबाधक इति· इड्प्रतिषेधस्येत्यर्थः। उपदेशाधिकारादिति· अन्यार्थमुपदेशग्रहणमनुवर्त्त्य उपदेशे चजागर्त्तिरुगंतो भवतीति संगः। इतरउपदेशाधिकारस्य प्रयोजनांतरमपश्यन्नाह· उपदेशग्रहणं निवर्त्तिष्यत इति· स्तीर्वाप्रवृत्तेति· इत्वादिषु कृतेष्वनुगंतत्वात्कृत्त्वे सा दोषो सांप्रतिकोगंतसंभवे कृतपूर्वगत्याश्रयणस्यायुक्तत्वादिड्प्रतिषेधोन स्यात् उपदेशाधिकाराक्तुपदेशेऽगंतत्वात्संप्रत्यनुगंतत्वेपिप्रतिषेधः प्रवर्त्तते· आनुपूर्व्येति· स्तृत्वा इति स्थिते कित्वनिषेधाश्रय इट्। इडाश्रयश्च कित्वनिषेध इति प्रागेव सन्निहितं कित्वमाश्रित्य इट्प्रतिषेधः प्रवर्त्तते न तद् इत्वादीनीत्यर्थः। अत्र चोद्यते· कृते षित्वादिषु प्रतिषेधनिमित्तोगंतत्वापगमात् पुनरिट् प्राप्नोति· तस्मिंश्च सति न क्त्वा सेडिति कित्वप्रतिषेधात् गुणे सति स्तरित्वेति प्राप्नोति· नैष दोषः। पूर्वमेव प्रसक्तस्यापि लक्षणस्य प्रतिषेधेन बाधितत्वात् लक्ष्यस्य संस्कृतत्वात्पुनः प्रवृत्त्यभावात्· आतिस्तीर्षतीति· श्युकः कितीत्यत्र विशिष्टानुबंधोपलक्षितः प्रत्यय आश्रितः सनिग्रहगुहोश्चेत्यस

सबाधको भविष्यति· तत्र गुणे रपरत्वे च कृतेऽनुगंतत्वादिड्प्रतिषेधो न भविष्यति· ननु चोपदेशाधिकारात्प्राप्नोति उपदेशग्रहणं निवर्त्तिष्यते· यदि निवर्त्त्यते स्तीर्वा पूर्त्वा इत्यत्र तयोः कृतयोः रपरत्वे चानुगंतत्वादिड्प्रतिषेधो न प्राप्नोति· नैष दोषः। आनुपूर्व्यात्सिद्धमेतत् न चाकृते इट्प्रतिषेधे इत्वोत्वे प्राप्नुतः· किं कारणं· न क्त्वा सेडिति प्रतिषेधात्· इदं तर्हि आतिस्तीर्षति निपुपूर्षतीति· इत्वोत्वयो रपरत्वे चानुगंतत्वादिड्प्रतिषेधो न प्राप्नोति· मा भूदेवं श्युकः कितीति इट्सनि वेत्येवं भविष्यति·

नतु सामान्यादिति विशेषमाश्रित्यास्योपन्यासः। अत्रेत्वरपरत्वयोः कृतयोरनुगंतत्वादिड्प्रतिषेधो न प्राप्नोति· सनियमगुहोश्चेत्यत्र चशब्देनोगनुकृष्यते· श्युकः कितीत्यनेन तत्र प्रतिषेधो नास्ति· इट्प्रतिषेधाश्रयत्वादुत्वादित्वस्य उत्वादिताश्रयत्वात् कित्वस्य किताश्रयत्वादिट्प्रतिषेधस्येतीतरेतराश्रयप्रसंगात्। इट् सनि वेति· स्तृ सन् इति स्थिते ऋकारांतावस्थायामेव पक्षे इडभावः। तथा हि· इड्विकल्पस्य निरवकाशत्वात्सांप्रतिकाभावे कृतपूर्वगत्याश्रयणान्नित्यत्वाद् न तावद् गुणस्य प्रवृत्तिः तत्रेट्पक्षे वृत्तो वेति दीर्घविकल्पे रूपत्रयमातिस्तरिषति आतिस्तरीषतीति इडभावपक्षे त्वातिस्तीर्षतीति· अत्रोच्यते· इडभावपक्षे कित्वाद् गुणनिषिद्धे इत्वरपरत्वयोः कृतयोः पुनरिट् प्राप्नोति· नत्वेट्सनि वेति विकल्पविधानमनर्थकं· ऋकारांतावस्थायां पक्षे इडभावे कित्वे सतीत्वरपरत्वयोः कृतयोरिटि सति गुणे च सत्यातिस्तरिषतीति रूपसंपादनेनार्थवत्त्वाद्विकल्पस्य·

=इत्येतत्तत्राश्रयेति· स्तीर्वा पूर्त्वेत्यादौ कृतः कित्वे सोपदेशिकत्वादानुपूर्व्यात्सिद्धिः कृत्वा· सनः कित्वं सत्वातिदेशिकत्वात् बहिरंगापायसापेक्षत्वादसतीतरेतराश्रयमिति= =सनिग्रहे सत्यपि कितीत्यनपेक्षणान्न दोष इति भावः। ५= भाष्ये श्युकः कितीत्यस्याः कइत्यन्वर्त्तमाने सनिग्रहणेनेत्यर्थः ।६=
इति भावः।४=

=इत्यर्थ इति· स्तीर्वा ... रंगत्वेन=
=पाक्षिकमिति कार्यकालपक्षे=
=इत्वप्रतिषेधयोः समत्वात्सत्व=
=त्वात्प्रतिषेध एव प्रवर्त्तते· य=
=थोद्देशपक्षेपि इत्वादेर्निमित्त=
=स्य कित्वस्येत्वादिप्रवृत्त=
=रभि इट्प्रवृत्त्या नत्वाऽस्ते=
=ति प्रतिषेधाकिमित्तरथेना=
=स्तृसंभवदिनेर्नित्यभावः।४=

आस्तीर्णमिति॰ कृते कृते वेटि कि देवनिषेस्यनेन विशेषेण स्योपन्यासः॥ यस्य विभाषेति॰ ननु ऋकारान्तस्यसनि विकल्पविधानाल्लिसत्वादितो वयोः कृतयोरन्तकारान्तत्वाद्यस्य विभा
षेति प्रतिषेधाप्रसंगः॥ नैष दोषः॥ सनि विकल्पविधाने ऋकारान्तत्वस्यापेक्षणेपि यस्य विभाषेत्यत्र यस्य कश्चिदिड्विकल्पोऽदृष्टः स धातुरन्त्रापि तेन तु विकल्पकारणम् ऋकारान्तं
तत्वं भवति वेत्तोत्वयोः कृतयोरपि स एव धातुरिति प्रवर्त्तते प्रतिषेधः॥ न देवमुपदेशग्रहणस्यान्तरवानुपयोगादन्तुवर्त्त नाज्ज्ञागरितइत्यत्र गुणरपरत्वयोः कृतयो
रनुगन्तत्वाच्छ्रुकः कितीतिप्रतिषेधाभावादुत्तरार्थमेकाज्ग्रहणं न कर्त्तव्यं॰ वध्यर्थमिति॰ वधशब्दो ऽकारान्तोनेकाजादेशः॥ इतरउपदेशग्रहणमनुदात्तस्यैव विशेष
णं न त्वेकाच इति मन्यमान आह॰ एतदपीति॰ वधिषीष्टेति॰ आशिषि लिङ् कर्मण्यात्मनेपदं अतो लोप इत्यकारलोपे कृते न वधिरेकाच् अकारोच्चारणं त्वबधीदित्यादौ ह

इदं तर्हि आस्तीर्णं निपूर्त्ताः पिंडाः इत्वोत्वयोः रपरत्वे चानुगन्तत्वादिट्प्रतिषेधो न प्राप्नोति॰ मा भूदेवमिट् सनि वेति सनि विभाषा यस्य वि
भाषेति प्रतिषेधो न विष्यति॰ उत्तरार्थमेव तर्हि वध्यर्थमेकाज्ग्रहणं कर्त्तव्यं वधइट्प्रतिषेधो मा भूदिति॰ वधिषीष्टेति॰ एतदपि नास्ति प्रयो
जनं॰ क्रियमाणेपि वै एकाज्ग्रहणे वधइट्प्रतिषेधः प्राप्नोति वधिषीष्टेति॰ किं कारणं वधइट्प्रतिषेधं सन्निपात एकाच्त्वात्प्रकृतेश्चा॥
नुदात्तत्वात्॰ सन्निपाते चैव हि वधिरेकाच् श्रूयते प्रकृतिश्चास्यानुदात्ता॰ किं पुनः कारणमेवं विज्ञायते उपदेशेनुदात्तादेकाचः श्रू
यमाणादिति यङ्लोपे मा भूदिति॰ बेभिदिता बेभिदितुं चेच्छिदिता चेच्छिदितुं॰ एकाच उपदेशेनुदात्तादित्युपदेशवचनमनुदात्तवि
शेषणं चेत्कृत्वा दिम्योलिदिनियमानुपपत्तिरप्राप्तत्वात्सति
लं न लक्षणं द्विनिवृत्त्यर्थं स्यात्॰ प्रकृतेश्चानुदात्तत्वादिति॰ यस्मात्प्रकृतिरिहतिरनुदात्तात
स्माच्चोपदेशावस्थागृह्यते सैव चानेन रूपेण वस्थिनेति संप्रत्ययः ततः प्रतिषेधः प्राप्नोति॰ ततश्च प्रकृतमप्येकाज्ग्रहणमनर्थकं॰ किं पुनरिति॰ उभयविशेषणमुपदे
शग्रहणमस्तु ततो वधेरुपदेशेनेकाच्त्वात्प्रतिषेधाप्रसंगः॥ बेभिदितेति॰ द्विःप्रयोगो द्विर्वचनं भवति भिदिरुपदेशेऽनुदात्तः उपदेशे एकाजि सतो लोपे कृते सं
प्रत्यनेकाच्त्वेपि प्रतिषेधप्रसंगः॥ श्रूयमाणे त्वेकाच्त्वाश्रीयमाणे आवृत्तिसंख्यये कत्वसंख्याया बाधनात्प्रतिषेधाभावः॥ समुदायस्य चैकांगसंज्ञानत्वप्रत्येकमिति
काचोंगादित्याश्रयणात्परमिद्रूपाश्रयोपि प्रतिषेधो न भवति॥ ॥७॥ ॥

अनुदात्तविशेषणं चेदिति॰ उभयविशेषणेप्यनुदात्तविशेषणं भवतीति सामर्थ्यादनुदात्तस्यैव यदि विशेषणमिति सवधारणं द्रष्टव्यं॰ असति नियम इति॰ क्रादित्वं प्रतिषे
धार्थमस्तु एवमपि चकृषेइत्यादि सिध्यति॰ बिभिदिवेत्यादौ चैकाच्त्वाभावात्प्रतिषेधाभावादिट् सिध्यतीति भावः॥ पेचिवेति॰ एत्वाभ्यासलोपयोः कृतयोरेकाचः श्रूयमाणा
दितीट्प्रतिषेधप्रसंगः॥ नीत्त इति॰ दधातेः क्तप्रत्यये चउपसर्गात्त इति तत्वे कृते नक्त्वादेकाच्त्वाभावादिट्प्रतिषेधाप्रसंगः॥ तस्य द्विपदाश्रयत्वाद्बहिरंगत्वादंतरंग

एकाचउपदेशेनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृत्रादिभ्यो लिटि नियमस्यानुपपत्तिः॥ किं कारणं॰ अप्राप्त[redacted]त्वात्प्र
तिषेधस्य॰ द्विर्वचने कृते उपदेशेनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति॰ असतीट्प्रतिषेधे नियमो नोपपद्यते॰ असति
नियमे को दोषः॥ तत्र पचादिष्विड्वचनं॰ तत्र पचादिष्विड्वक्तव्यः॥ पेचिव पेचिम शेकिव शेकिम॰ सनश्चेट्प्रतिषेधः॥ सनश्चेट्प्रतिषे
धो वक्तव्यः॥ बिभित्सति चिच्छित्सति॰ द्विर्वचने कृते उपदेशेनुदात्तादेकाचः श्रूयमाणादितीट्प्रतिषेधो न प्राप्नोति इडेव नीत्तः॥ तत्वे नक्त्वादि
ट्प्रतिषेधो न प्राप्नोति॰ नैष दोषः॥ आनुपूर्व्यात्सिद्धमेतत्॰ नात्राकृते इट्प्रतिषेधे तत्वं प्राप्नोति॰ किं कारणं॰ निमित्तं नीत्युच्यते॰ यदप्युच्यते ए
काचउपदेशेनुदात्तादित्युपदेशवचनमनुदात्तविशेषणं चेत्कृत्रादिभ्यो लिटि नियमानुपपत्तिरप्राप्तत्वात्प्रतिषेधस्येति॰ मा भूदि
यमः॥ ननु चोक्तं तत्र पचादिष्विड्वचनमिति॰ नैष दोषः॥ उक्तं तत्र थल्ग्रहणस्य प्रयोजनं समुच्चयो यथा विज्ञायेत थलि च सेटि क्ङिति च से
टीति॰ यदप्युच्यते सनश्चेट्प्रतिषेध इति॰ उभयविशेषणत्वात्सिद्धं॰ उभयमुपदेशग्रहणेन विशेष्यिष्यामः॥ उपदेशेनुदात्तादुपदेशे एका

इट्प्रतिषेधे सिद्धत्वादिति परिहारः॥ परिहारांतरस्य सद्भावाल्लाश्रितः॥ तदेव दर्शयति॰ आनुपूर्व्यात्सिद्धमिति॰ थल्ग्रहणस्येति॰ आरंभसामर्थ्यादेतदेकमध्येनादेशादेर्लिटी ति स
नुवर्त्तनाद्यांतरेणापि यः ग्रहणं थल्येव सेघेत॰ अभ्यासलोपयोः सिद्धत्वात् ग्रहणं क्ङितासमुच्चयार्थं ततश्चेटि कृते एत्वाभ्यासलोपयोर्विधाने पेचिवेत्यादीनि रूपाणि सिध्यं
तीति नार्थः क्रादिनियमेन॰ उभयविशेषणत्वादिति॰ एवं सत्युभयं विशेषणत्वेन संस्पर्शादनुदात्तं भवति॰ एतदर्थं चोपदेश इति मध्ये पठितं॰ उभयविशेषणे च क्रादिति

=अक्रिया: सेटो लिट् सत्वत एवं संभवादिलर्थः॥ २= क्ङितेति सेटीत्युभयविशेषणं॰ तत्र सेड्ग्रहणं कालावधारणार्थं॰ २=

×नन्वेवं द्विर्वचनित्वनीसन्नामिघ्नतिषेधाप्रसंगः।२×

मा॰ के॰

३५

सन्यङः तस्येति॰ सन्यङोरिति षष्ठी तत्र भिघ इत्यस्य प्रकृतिप्रत्ययसमुदायस्य सर्वे सर्वपदादेशा इति शब्दान्तरआदेशे कृते ऽयं धातुरयं प्रत्यय इति विभागाभावादिट्प्रतिषेधाभावः
इडप्यस्मिन्पक्षे न प्राप्नोति सदोषः। अथवा त्रासमाश्वासात्सक्षांतराश्रयेण इद्। अथापीति॰ नलस्येति॰ आचार्यस्य भिघुपदेशमाश्रित्येकाच्त्वादनुदात्तत्वाच्चेट्प्रतिषेधः स्यात्। यङ
तस्य त्वनुपदेशोऽयमाणे तस्यानेकाच्त्वादनुदात्तत्वाच्च प्रतिषेधाप्रसंगः। ननु च प्रत्यक्षमाख्यानमनुपदेश इत्युक्तं यङादीनां च प्रत्ययानामुपदेशोऽस्ति न तु तदन्तानां शब्दा
मनुमेयरूपाणां॰ नैष दोषः। संकीर्णत्वे देशोप [redacted] देशाविसपितत्रैवोक्तमत एवेत्संज्ञायां करणसाधन उपदेशशब्दः शास्त्रवाच्याश्रितः इह तु भावसाधन
आश्रीयते तेन प्रतिपादनमात्रं गुणैर्वा प्रत्यक्षेणायोपदेश इत्युच्यते यद्विधानद्वारेण च वेभिघ इत्यस्य समुदायस्य क्रियाविशेषवचनस्याद्यप्रतिपत्तिरस्तीति वेभि

सन्यङः तस्य स्थाने द्विर्वचनं तत्र संप्रमुग्धत्वात्प्रकृतिप्रत्ययस्य नष्टः सन्भवति यः स एकाच उपदेशेऽनुदात्तः। अथापि द्विःप्रयोगो द्विर्वच
नमेवमपि न दोषः। नलस्य भिघुपदेश उपदेशः किं तर्हि वेभिघुपदेश उपदेशः। अथापि भिघुपदेश उपदेश एवमपि न दोषः। अकारेण व्य
वहितत्वान्न विप्यति॰ ननु च लोपे कृते नास्ति व्यवधानं॰ स्थानिवद्भावाद्व्यवधानमेव॰ पूर्वविधौ स्थानिवद्भावो न चायं पूर्वविधिः।
पूर्वस्मादपि विधिः पूर्वविधिः। कः पुनरुपदेशो न्याय्यः। यः कृत्स्नः। कश्च कृत्स्नः। य उभयोः। यदि तर्हि य उभयोः स कृत्स्नः स च न्याय्यः।

घुपदेश इत्युक्तं॰ वेभिघशब्दादिकृतितपावितीक्प्रत्यये ऽलोपयलोपयोर्वेभिदि इति भवति॰ अथ वेत्संज्ञाविधावुच्चारणवचन उपदिशिर्गृह्यते तदुक्तमुद्देशश्च प्रातिप
दिकानां नोपदेश इति॰ इह तु प्रतिपादनवचन इति विरोधाभावः। अथापि भिघुपदेश इति॰ उच्चारणवचने ऽप्युपदिश्यमाने प्रत्यक्षमाख्यानवचनेवादोषो
नेत्यर्थः। द्विप्रकार उपदेश इत्युक्ते पृच्छति॰ कः पुनरिति॰ किं भिघुपदेशो ऽथ वेभिघुपदेश इत्यर्थः। यः कृत्स्न इति॰ कृत्स्नकारित्वात्कृत्स्नः। स च भिघुपदेश
एवं॰ स हि सर्वसाधारणत्वाद्वेभिघतद्रूपेवमादीनां प्रतिपत्तिहेतुत्वात् उभयोरिति॰ केवलस्य भिदेर्वेभिघादेश्चावयवसमुदायस्य धातोर्ग्रह
क इत्यर्थः। एतदुक्तं भवति॰ भिदादीनामेवोपदेशोऽस्ति न तु सनाद्यन्तानामवयवसमुदायानामुपदेशशब्दस्य साक्षात्प्रतिपत्तिहेतुशास्त्रवाचिन आश्रयणात्।। शिवः

३५

वधइड्प्रतिषेधइति· भिघुपदेश स्थानीयो हंस्युपदेशस्तत्र हंतिरेकाजनुदात्तश्चेति सत्यपि वधेरुपदेशेऽनेकाच्त्वे हंस्युपदेशधर्माश्रये इड्प्रतिषेधप्रसंगः। नचा
कारलोपस्य यङंतत्वात्रापि स्थानिवद्भावेन व्यवधानं सत्यपि स्थानिवत्वे प्रकृतिप्रत्यययोरानंतर्याघङं तेतु स्थानिवत्वादकारेणाभेदप्रत्यययोरानंतर्य

वधइड्प्रतिषेधः प्राप्नोति· वधिषीष्टेति·नैष दोषः। आद्युदात्तनिपातनं करिष्यते स निपातनस्वरः प्रकृतिस्वरस्य बाधको भविष्यति·
एवमप्युपदेशिवद्भावो वक्तव्यः। स यथैव निपातनस्वरः प्रकृतिस्वरं बाधते एवं प्रत्ययस्वरमपि बाधेत· आवधिषीष्टेति·नैष दो
षः। आर्द्धधातुकीयाः सामान्येन भवंति अनवस्थितेषु प्रत्ययेषु तत्रार्द्धधातुके सामान्ये वधिभावे कृते सति शिष्टत्वात्प्रत्ययस्वरो
भविष्यति· अथ के पुनरनुदात्ताः। आदंताः अदरिद्राः इवर्णांताश्चाश्वि श्रिङी शी दी धी वेवीङः। उवर्णांताः युरुणुक्ष्णुक्ष्णुस्नूर्णुवर्जं
ऋदंताश्चाजागृवृङ्वृञः। शाकिः कवर्गांतानां· पचिवचिसिचिमुचिरिचिविचिप्रच्छियजिभजिभ्रस्जिसृजिनिजुजिभ्रस्जिमस्जिरुजि
युजिणिजिविजिसंजिस्वंजयश्चवर्गांतानां· सदिशदिहदिछिदिनुदिनुदिस्विदिभिदिस्कंदिक्षुदिखिदपतिविंदिविघातिराधिपु
धिबुधिरुधिशुधिक्रुधिसाधिव्यधिबंधिसिध्यतिहनिमन्यतयस्तवर्गांतानां· तपितिपिवपिशप्रिक्षुपिलुपिलिपिस्वप्यापिक्षिपिसृ
पितपिदपियभिरभिलभिपमिरमिनमिगमयः पवर्गांतानां· रुशिरिशिदिशिविशिलिशिस्पृशिदशिक्रुशिमृशिदंशिलिषि =७= मृ
षिकृषिश्लिषिविषिपिषिरुषिदुषिद्विषिघसिवसि[illegible]हिहिहि दुहिनहिरुहि यहिलिहिमिहयश्चोष्मांतानां· वसिः प्रसा

विवेदात्· आद्युदात्तनिपातनमिति· तत्सामर्थ्यादुपदेशविषयानुदात्तताश्रय इड्प्रतिषेधो न भवति न सेतराद्युदात्तत्वं प्रयोगसमवायि प्रत्ययस्वरेणातस्य
बाधनात्· आर्द्धधातुकीया इति· आर्द्धधातुके भवा इति व्यक्तव्यः। यदितर्यार्द्धधातुकविशेषनिमित्ता अपि अनवस्थितेषु प्रत्ययेषु भवंति तदायदुक्तं वधिभावा
सीयुटि चिण्वद्भावो विप्रतिषेधेनेति तद्विरुध्यते· अंतरंगत्वाद्धि बहिरंगत्वाच्चिण्वद्भावस्य विप्रतिषेधायोगादिति चिंत्योऽत्र समाधिः॥ ॥७॥ ॥७॥

=आगोपत्यनइतिकर्त्तव्या=
=स्तनेपदं·२=

अत्रायमपाठः मृष
सिनिष्प्तीति सेटः त्वा
विधानात्·

=यन्वेकाच्त्वात् नित्यत्वेऽप्युपदेशग्रहणस्योपलक्षणत्वाभावे उक्तदूषणतदाश्रयणमिति विशेष्यं परिहरति· एकाचितिः=

प्रतिषेध

भा·कै·
३६

दसम्भत्·॥ ॥क्रमो सुटइति· क्रने पि सुट्किये तिर्भवत्येवे नि सुट्प्रसंगः॥ गुणे कृते इति· कृतश्च संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्त्तव्यमिति वचनेन· अनुगं तत्वादिति· श्युकः कितीत्यत्र उग्रहणमिहानुवर्त्तत इति मन्यते· एवमपीति· यद्यपि संप्रति नोगंतः तथाप्युपदेश उगंत इति स्यात्प्रतिषेधः॥ किमर्थमुपदेश इत्यनु वर्त्तत इति चेत्तु श्रेधयेत्यादौ कृते पि गुणे इट् प्रतिषेधार्थं· यद्येवमुक इत्यपि नानुवर्त्यं· एवं तर्ह्येतदनेनोक्तं भवति सत्यसति योगाधिकारे क्रमोऽसुट् इत्यवश्यं वाच्यमिति नार्थउगधिकारेण·॥ ॥श्रीदिः॥ ॥स्तीर्णास्तीर्णमित्यादीनामुपदेशग्रहणानुवृत्तिमन्तरेण सिद्धेरभिधानादुपदेशाधिकारेऽत्र नास्तीति मत्वा ह· श्विग्रहणं किमर्थमिति· ननु च श्वित इति स्थिते संप्रसारणात्परत्वादिट् प्राप्नोति· नित्यत्वात्संप्रसारणं न विष्यतीति मन्यते· यस्य लक्षणान्तरेणेति का चिन्नाश्रीयत इति पूर्वमेवोक्तं संप्रसारणनिमित्तत्वादिज्भावस्य तत्सन्निकृते इटोऽप्रवर्त्तनादनित्यत्वं संप्रसारणस्य तु कृताकृतप्रसंगित्वान्नित्यत्वं· श्विग्र हणमिदं तत्वादिति· एकाज्ग्रहणोत्तरार्थता प्रसारव्यानायानुपूर्व्यां सिद्धमित्यादिनचोक्तं तत्सेकाज्ग्रहणमन्यार्थं स्फुटतरत्वापि प्रतिपत्तिगौरवपरिहारायानुवर्त्त्यं ग्लितं

दसम्भत्·॥ ॥क्रमोऽसुटः॥ क्रमः अ सुट इति वक्तव्यं· इण्माभूत्· संचस्करिव संचस्करिम· तत्र हि वक्तव्यं न वक्तव्यं· गुणे कृते रपरत्वे चानुगंतत्वादिट्प्रतिषेधो न भविष्यति· एवमप्युपदेशाधिकारात्प्राप्नोति· तस्मादसुड् इति वक्तव्यं·॥ ॥श्रीदिनो नियामं·॥ ॥श्वि ग्रहणं किमर्थं· न प्रसारणे कृते प्रसारणपरपूर्वत्वे च उगंतादित्येव सिद्धं· अत उत्तरं पठति· श्वियग्रहणमिदं तत्वादुपदेश तनश्च जागरितइत्यत्र श्युकः कितीतिइट्॥ स्य· श्विग्रहणं क्रियते इदं तत्वादुपदेशस्य· उपदेश उगंतादित्युच्यते श्वयतिश्चोपदेशे इदंतः॥

पे२ प्रतिषेधो न भवति· ननु वक्ष्यमाणैकाज्ग्रहणं प्रसारव्यातमेवाघुदात्तनिपातनाश्रयेणेदं सूपदेशे गृह्यमाणे न दुक्तं· न ह्युपदेशे त्वाश्रीयमाणे एकाज्ग्रहणे नैव वध्येरिट् साध्यते· आघुदात्तनिपातने त्वाश्रीयमाणे वधिवीश्रेत्याघुदात्तत्वप्रसंगनिवारणाय लिङीति विषयसप्तम्याश्रयणीया तथा च घानिषी ष्टेति विप्रतिषेधाद्विरेवभावानुपपत्तिरंतरंगत्वाद्वधिभावप्रसंगात्· यङ्लुङ्विवक्षार्थं चैकाज्ग्रहणं कर्त्तव्यं तस्मिन्क्रियमाणे यत्रैकाज्ग्रहणं किं चित्संचैतानिनयङ्लुकीति वचनात् वेविदितेत्यादावयी इट् सिध्यति· उपदेशग्रहणमपि श्युकः कितीत्यत्रानुवर्त्त्यं अन्यथा स्तीर्णेत्यादि सिद्धये नंतप्रका रपरिहाराश्रयणे प्रतिपत्तिगौरवानुषंगः इदमेव श्विग्रहणमुपदेशाधिकारस्य न त्र ज्ञापकं अन्ये त्विह श्विग्रहणं सर्वविधिष्विड्विधिर्बलीयानित्यस्य शिवः ३६

=तेन श्वयिष्यत्यत्र संप्रसारणं स्यादिति तन्नोपन्यासेडितिकृतेभिधानसंप्रसारणं

यस्यविभाषा॥ ॥विभाषागमहणनविदद्विभाषितिकस्मैविकल्पविधानादेवनिष्ठायांप्रतिषेधःप्राप्नोतीतिमत्वाह॥यस्यविभाषावाविदेरिति॰वेत्तिरत्रविवक्षितः॥
विद्लृलाभेइत्यस्यप्रतिषेधोभवत्येवविन्नइति॰विघतिविनस्मोस्तुअनुशन्नलादिष्प्रतिषेधः॥यदुपाधेरिति॰उपाधिरभिधेयादिर्भेदकः॥श्नविकरणस्यविभा
षेति॰विशिनाशेदादिकेनसाहचर्यात्नोदादिकस्यैवलाभार्थस्यविभाषेतिज्ञानार्थस्यसत्यपिविदिरूपत्वे॰अर्थस्यभेदकत्वेनरूपवदाश्रयणात्प्रतिषेधाभा
वः॥यद्यपिहंतिसाहचर्यंविदेरस्तितथापिशब्दपरविप्रतिषेधाद्विशिर्यवस्याहेतुर्नहंतिः॥ ॥आदितश्च॥ ॥एवंतर्हीति॰रूपाभेदेपियदुपाधीनांभेदकत्वंन
स्याद्योगविभागेनर्थकःस्यात्॰भेदकत्वेतुतेषांभावादिकर्मणोर्विकल्पविधानात्कर्त्तरिनिष्ठायांप्रतिषेधोनस्याद्भावादिकर्मणोरपिविकल्पप्रतिषेधयोर्वि

यस्यविभाषा॥ ॥यस्यविभाषा॰विदेः॥यस्यविभाषा॰विदेरितिवक्तव्यं॰इहमाभूत्॰विदितःविदितवानिति॰तत्तर्हिवक्तव्यंनवक्त
व्यं॰यदुपाधेर्विभाषातदुपाधेःप्रतिषेधः॥श्नविकरणस्यविभाषालुग्विकरणस्याथं॥ ॥आदितश्च॥ विभाषाभावादिकर्मणोः॥ ॥कि
मर्थोयोगविभागः॥नआदितोविभाषाभावादिकर्मणोरित्येवोच्येत॰केनेदानींकर्त्तरिप्रतिषेधोभविष्यति॰यस्यविभाषेत्यनेन॰ए
वंतर्हिसिद्धेसतियद्योगविभागंकरोतितज्ज्ञापयत्याचार्यःयदुपाधेर्विभाषातदुपाधेःप्रतिषेधइतिकिमेतस्यज्ञापनेप्रयोजनं
यस्यविभाषाअविदेरित्युक्तंतन्नवक्तव्यंभवति॥ ॥क्षुब्धस्वांतध्वांत॥ ॥क्षुब्धंमंथाभिधानइतिवक्तव्यं॰क्षुभितंमंथेनेत्येवान्यत्रक्षु
ब्धं॰स्वांतंमनोभिधानइतिवक्तव्यं॰स्वनितंमनसेत्येवान्यत्रस्वांतं॰ध्वांतंतमोभिधानइतिवक्तव्यं॰ध्वनितंतमसेत्येवान्यत्रध्वांतं॥ ॥

रोधात्प्रतिषेधोनस्यादितिकर्त्तृकर्मनिष्ठार्थोयोगविभागः॥यदितर्हुपाधिर्भेदकस्तत्तउदितोवेतिक्त्वाप्रत्ययेभाव वाविनिविकल्पविधानाद्भाववाचिन्यामेवनिष्ठायां
प्रतिषेधःस्यान्नकर्त्तृकर्मवाचिन्यां॰नैषदोषः॥तेननिर्दृत्तोनिर्दृत्तोक्षद्यूतादिभ्यइतिलिंगात्प्रत्ययार्थोभेदकत्वेननाश्रीयते॥ ॥क्षुब्ध॥ ॥क्षुब्धमिति॰यदिधात्वर्थो
पाधित्वेनमंथादयआश्रीयेरन्मंथादिसाधनेधात्वर्थेक्षुब्धादयोनिपात्यंतइतितदाक्षुभितंमंथेनेत्यत्रापिभावेक्तस्यप्रतिषेधःस्यादितिसमुदायानामभिधेय
भावेनमंथादयइहोपात्ताइतिप्रदर्श्यते॰द्रवद्रव्यसंपृक्ताःसक्तवोमंथः॥क्षुब्धांगिरिनदीमिवेत्यादयस्तुप्रयोगाअसाधवइत्याहुः॥अन्येतूपमानमाश्रित्यसम

=मत्वार्थोभेदकत्वेनेति॰श्राद्धेनाश्रीयमाणउपाधिरेवभेदकइत्यनेनज्ञाप्यते॰साहचर्यलभ्योपिशब्दोपात्तएव॰क्तोभाववाचित्वंतुमाद्येनाश्रितमितिभावः॥१=

भा॰कै॰
२७

ध्वषि॰॥ ॥वियातआव इति॰ विरूपं यातं गमनं यस्य स वियातोऽविनीतः॥ ॥दढः॥ ॥न दहेरिति॰ दह दहिर् दृह दृहि वृहि इति धातुरुपपद्यते तत्र दृढः स्थूलबलयो
रिति इढ एव प्रतिषेधो विधेय इति मतान्तरम्॥ दृढ निपातनमिति॰ दादेर्धातोर्घ इति घत्वस्य प्रतिषेधो वक्तव्यः स्यात्॰ अनिट्त्वचने हीति॰ यदी नेघत्वस्य च प्रति
षेधो विधीयते ततो ढत्वधत्वष्टुत्वढलोपेषु यथापि दृढ इति रूपं सिध्यति तथापि पूर्वत्रासिद्धमिति ढलोपस्यासिद्धत्वात् संयोगे गुरु इति गुरुसंज्ञायां सत्यां
तन्निबंधनकार्यप्रसंगो लघुसंज्ञाहेतुककार्याप्रसंगश्च॰ दृढीयानिति॰ रविधौ पृथुमृदु इत्यादिपरिगणनेन मनपेक्ष्यो अतेपरिगणने हि विशेषणानां प्र

ध्वषि शासी वैयात्ये॰॥ ॥किमिदं वैयात्यमिति॰ वियातभावो वैयात्यं॰॥ ॥दृढः स्थूलबलयोः॥ ॥दृढ इति निपातनं किमर्थं न दृहेर्नेड्व
ती त्येवोच्येत॰ दृढ निपातनं नकारहकारलोपार्थं परस्य च ढत्वार्थं॰ दृढ निपातनं क्रियते नकारहकारलोपार्थं॰ नकारहकारयो
र्लोपो यथा स्यात् परस्य च ढत्वं यथा स्यात्॰ अनिट्त्वचने हि रभावाप्रसिद्धिरलघुत्वात्॰ अनिट्त्वचने हि रभावस्याप्रसिद्धिः स्यात् दृ
ढीयान्॰ किं कारणं अलघुत्वात्॰ नलोपवचनं च॰ नलोपश्च वक्तव्यः॥ इह च परिदृढव्यागतः ल्यपि लघुपूर्वस्येत्ययादेशो न स्यात्॰
इह च परिदृढीकन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत॰॥ ॥प्रभौ परिदृढः॥ ॥परिदृढ इति किमर्थं निपात्यते न परिपूर्वाद् दृहे
र्नेड्वतीत्येवोच्येत॰ परिदृढ इति निपातनं च॰ किं॰ नकारहकारलोपार्थं परस्य ढत्वार्थं॰ अनिट्त्वचने हि रभावाप्रसिद्धिरलघुत्वात्
नलोपवचनं चेत्येव॰ परिदृढीयानिति रऋतो हलादेर्लघोरिति रभावो न स्यात्॰ इह च परिदृढव्यागत इति ल्यपि लघुपूर्वस्येत्यया
देशो न स्यात्॰ इह च परिदृढीकन्येति गुरूपोत्तमलक्षणः ष्यङ् प्रसज्येत॰
सारव्यानाद्रभावः सिध्यति॰ नलोपवचनं चेति॰ दृंहे रिदित्वान्नलोपो न प्रा
प्नोति दृहेस्तु स्थूलबलयोरदिदुहितमितीष्यते॰ दृह दृहि दृंहिधा वेव धातुपृष्ठे नेड्इति वार्त्तिककाराभिप्रायं केचिदाहुः॥ तथा च दृंहे रच्य नि दी तिन लोपमुक्तवान्
भाष्यकारस्त्वेतद्वचनप्रत्याख्यानाय धातुचतुष्टयमिष्टमेव॰ परिदृढीति॰ दतोमनुष्यजातेरिति ङीष्॰॥ ॥प्रभौ॰॥ ॥परिदृढव्येति॰ कथं पुनरत्र ल्यबादेशो यावता परि
दृढ्माचष्टे इति णिचि कृते क्त्वा प्रत्यये च क्तांतस्य कृदंतत्वान्नैवपरे रंतर्भावात् पुनः समासाभावः॥ नैष दोषः॥ संग्राम यते रेवं सोपसर्गात्सयोगस्तितर्नान्य स्मादिति
आदितिः दरिशब्दं पञ्चकृता दृढशब्दादेव णिच् क्रियते ततो दृढिशब्दस्य धातुत्वात् क्त्वा प्रत्यये कृते प

शिवः
२७

=एवंम निर्देशे तुषोपि दिविस्यादिति भावः। १=

घुषि॥ ॥किमर्थमिति॥ घुषिरविशब्दने अवादेशोपपद्यते स विशब्दने नैव वर्त्तते यस्तु घुषिर्विशब्दने इति चुरादौ पठ्यते तस्मात्णिचा भवितव्यं केवलस्य तु घुषिरूपात्तश
तिनार्थो विशब्दन इति प्रतिषेधेन॰ विशब्दनं स्वाभिप्रायस्य शब्देन प्रकाशनमुच्यते॰ एवं तर्हीति॰ अविशब्दन एवेडभावे सिद्ध इत्यर्थः॥ किमेतस्येति॰ किं निष्ठायां
घुषितं घोषितमिति रूपद्वयसिद्धिः प्रयोजनमथान्यदपीति प्रश्नः॥ जुघुषुरिति॰ घोषयांचक्रुरित्यपि भवति॰ अन्ये त्वनित्यण्यन्ताश्चुरादय इति साम
न्येन ज्ञाप्यत इत्याहुः॥ केचिच्चितिस्मृ सामिनी दिवं चुरादिणिचो॰ऽनित्यत्वस्य ज्ञापकमाहुः॥ इदित्वेन नुम्विधाने प्रयोजनं चिंतितमिति साधोन लोपाभावः यदि
च चुरादिणिचू नित्यः स्यात्तदा चिंतस्मृ सामिलेव पठेत् णिचि सति नलोपाप्रसंगात्॥ ॥णेरध्य॥ ॥किं पुनरिति॰ किमभिधेयत्वेन क्तांतस्याध्ययनम

घुषिरविशब्दने॥ ॥किमर्थमविशब्दन इत्युच्यते न विशब्दने चुरादिणिचा भवितव्यं एवं तर्हि सिद्धे सति यदविशब्दन इत्याह त
ज्ज्ञापयत्याचार्यो विशब्दने घुषेर्विभाषा णिज्भवतीति॰ किमेतस्य ज्ञापने प्रयोजनं॰ महीपालवचः श्रुत्वा जुघुषुः पुष्यमाणवाः एष
प्रयोग उपपन्नो भवति॥ ॥णेरध्ययने वृत्तं॥ ॥किं पुनरिदमध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते आहोस्विदध्यय
ने चेद्वृत्तिर्वर्त्तत इति॰ किंचातः॥ यद्यध्ययनाभिधायिकायां निष्ठायां निपातनं क्रियते सिद्धं वृत्तो गुणः वृत्तं पारायणं॰ वृत्तं गु
णस्य वृत्तं पारायणस्येति न सिध्यति॰ अथ विज्ञायते अध्ययने चेद्वृत्तिर्वर्त्तत इति न दोषो भवति॰ यथा न दोषस्तथास्तु॰ अध्यय
श्रीयते अथ भावार्थसाधनत्वेनेति प्रश्नः॥ अध्ययने चेदिति॰ (ने चेद्वृत्तिर्वर्त्तत इत्यपि विज्ञायमानेन न सिध्यति॰ किं कारणं॰ वृत्तिरयमकर्मकः॥ अकर्म
अध्ययनविषये भावार्थ इत्यर्थः॥ वृत्तो गुण इति॰ अध्ययनसामान्यं वृत्तशब्दस्याभिधेयं न तु तद्विशेष इति विशेषवाचिशब्दप्रयोगाविरोधः॥ गुणः पदक्रमसं
हितारूपोऽध्ययनविशेषः॥ वृत्तो निष्पादित इत्यर्थः॥ वृत्तं गुणस्येति॰ भावे निष्ठा तस्या अध्ययनं नाभिधेयमिति वृत्तशब्दप्रयोगाप्रसंगः॥ न सिध्यतीति॰ एवं
तस्येति भावः॥ एवं तस्य सकर्मकत्वाद्वृत्तं गुणस्येति भावे निष्ठाया अप्रसंगात् योरेव कृत्यक्तखलर्था इत्यत्र भावे॰ऽकर्मकेभ्य इत्यनुवर्त्तनात्॰ वृत्तिरयमिति॰ केव
लस्य सकर्मकत्वाशंका निराकृता॰ एवं तस्य सकर्मकत्वं प्रतिपाद्यते॰ प्रयोज्यमंतरेण णिचोऽभावात्तेनास्य सकर्मकत्वं॥ ॥छ॥ ॥श्रीः॥ ॥

=अध्ययनशब्दो वाकुलकत्वात्कर्मत्वं उनोग्रंथवाचीति भावः॥ अतएव वक्ष्यति संहितारूपोऽध्ययनविशेष इति॰ नन्वेवमध्ययने चेद्वृत्तिर्वर्त्तत इति भाष्यमनुपपन्नमत आह॰ अध्ययनविषय इति॰ ४=

भा·के· ३८

तच्चैतत्स्यात्· भवतु सकर्मकत्वं कर्मण्येवात्र निष्ठा भवति आहः· अकर्मकश्चात्रेति· रुचङ्गुणस्येत्यादावविसर्पः॥ अकर्मकाणामिति· भावे क्तविधानात् सकर्मकत्वं प्र
तीयते इत्यर्थः॥ कर्तरि क्तो गुणे इति सामानाधिकरण्येन भाव्यं भावे तु क्ते शेषविवक्षायां षष्ठी भवति· तस्मान्नैतद्यं तस्य घनेरूपमपि तु केवलस्य तस्य
चमस्य विभाषेतीट्प्रतिषेधोऽस्त्येव· एवं चाध्ययनमभिधेयं भवतु विषयो वेति न कश्चिद्दोषः॥ अत्राहुः॥ रुचङ्गुणस्येति सकर्मकादपि एवं तान्नपुंसके
भावे क्त इति भावे क्तोऽस्त्येव· यस्तु निष्ठेति प्रयुक्तः स एवाकर्मकेभ्यो भावे भवति रुचङ्गुणस्येत्यत्र च वर्तमानत्वं प्रतीयते न भूतत्वं· अत्रोच्यते· नपुंसके
भावे क्त इत्ययमपि क्तः सकर्मकेभ्यो न भवति· तयोरेव कृत्यक्तखलर्था इत्यत्र क्तमात्रस्य ग्रहणं तत्र च भावे चाकर्मकेभ्य इत्यनुवर्तनात्· अवश्यं

अकर्मकश्चात्र इति॥ कथं पुनर्ज्ञायते अकर्मकोऽत्रेति रिरिति· अकर्मकाणां भावे क्तो भवतीत्येवमत्र भावे भवति· ततउदितः क्त्वि विभाषाय
स्य विभाषेतीट्प्रतिषेधो भविष्यति· अथ णिग्रहणं किमर्थं· रुष्ट निपातने णिग्रहणमत्र तस्यावधारणप्रतिषेधार्थं· रुष्ट निपा
तने णिग्रहणं क्रियते अणन्तस्यावधारणमाह इति· केमर्थ्यान्नियमो भवति विधेयं नास्तीति कृत्वा· इह चास्ति विधेयं ण्यधिका
द्धते रिट्प्रतिषेधो विधेयः॥ तत्रापूर्वो विधिरस्तु नियमोऽस्त्विति अपूर्व एव विधिर्भविष्यति न नियमः॥ कुतो नु खल्वेतदधिकार्थमा
रम्भे सति ण्यधिकस्य भविष्यति न पुनः सन्नधिकस्य वा स्याद्वाद्यधिकस्य वेति· तस्माण्णिग्रहणं कर्तव्यं· अथ किमर्थं निपातनं क्रियते· नि
पातनं णिलोपे गुणप्रतिषेधार्थं· निपातनं क्रियते णिलोपार्थमिड्गुणप्रतिषेधार्थं च॥

तास्वयोगेषु
चेनकोद्धव्यं· अन्यथा नपुंसके भावे उपसंख्यानमित्यस्मिंश्चेष वि
शानासिद्धमिति प्रत्याख्याते सकर्मकाद्भावे क्ते विधीयमाने कर्मणो द्वितीया प्रसज्येत यामं गतं मोदनं भुक्तमिति· अथ णिग्रहणं किमर्थमिति· केवलस्य यस्य वि शिवः
भाषेति प्रतिषेधस्य सिद्धत्वात् सामर्थ्याण्ण्यन्तस्य निपातनं विज्ञास्यते· रुष्टनिपातनमिति· असति णिग्रहणे ण्यन्तस्यैवेदं निपातनं न तु सन्नन्तस्य यङन्तस्येति निश्चय
भावाद्विधिरयं भवतु उपगन्तुमिति नियमो विज्ञायते· णिलोपार्थमिति· निष्ठायां सेटीति वचनादनिटि निष्ठायां णिलोपो न प्राप्नोति गोरनिटीत्यनेनापि ३८
न क्वकौङित्न्यायेन सेटि निष्ठायां विधीयमानेन णिलोपेनानिटि निष्ठायां णिलोपस्य बाधनात्· प्रत्ययलक्षणेन प्राप्तस्य गुणस्य चाभावो निपात्यते॥

=अभ्यमनत्वेलेवमिसर्पः२= =शेवलाविवक्षायां·४= विधिरयमाइति·एवं तस्मा ... ते र्णहणे हि तस्य निष्ठायां णिलोपे इट्प्रतिषेधयोर्ज्ञापनान्तरेणाप्रसक्त इत्यर्थमिदं सामान्यपेक्षर्पः२=

वर्ण्यावशिष्टानीत्यत्र तात्पर्यं अन्यथापदांते तु कि विकल्पेत

वादांत॥ ॥उपधादीर्घत्वमिति पूर्वत्रासिद्धेन स्थानिवदितिवक्तव्यं तस्मिंश्चोच्यमाने द्विर्वचनादीनिवरेल्लोपस्वरपदांतवर्ज्जंनवक्तव्यानीतिदीर्घविधौस्था निवत्तनिषेधादनुनासिकस्यक्विझलोः क्ङितीतिदीर्घत्वाप्रसंगः कृत्वारंजाश्रयेणानुदीर्घत्वसिद्धिंभाष्यकृन्मन्यते॥ ॥हृषे॥ ॥कृत्रकारो लोमशद्वं सामा

वादांतशांत॥ ॥दांतशांतयोः किंनिपात्यते दांतशांतयोरुपधादीर्घत्वंच किंच णिलोपे इट्प्रतिषेधोच उपधादीर्घत्वमनिपात्यंद्वयासिद्धं न सिध्यति मितांह्रस्वइतिह्रस्वत्वेन भवितव्यं एवं तर्ह्यनुनासिकस्य क्विझलोः क्ङितीसेवात्रदीर्घत्वं भविष्यति न सिध्यति किंकारणं णिचा व्यवहितत्वात् णिलोपे कृतेनास्तिव्यवधानं स्थानिवद्भावाद्व्यवधानमेव प्रतिषिध्यते च स्थानिवद्भावो दीर्घविधिंप्रतिनस्थानिवदिति अपस्पष्टछन्नयोः किंनिपात्यते स्पष्टछन्नयोरुपधाह्रस्वत्वंच किंच णिलोपे इट्प्रतिषेधोच॥ ॥ कव्यमतर॥ ॥घुषिस्वनो र्वावचनमिट्प्रतिषेधाद्विप्रतिषेधेन घुषिस्वनोर्वावचनमिट्प्रतिषेधाद्भवतिविप्रतिषेधेन घुषेरिट्प्रतिषेधस्यावकाशः असंपूर्वाद् विशब्दनं घुष्टारज्जुः घुष्टोमार्गः वावचनस्यावकाशः संपूर्वाद्विशब्दनं संघुष्टंवाक्यं संघुषितंवाक्यं संपूर्वाद्विशब्दने उभयंप्रा प्नोति संघुष्टारज्जुः संघुषितारज्जुः वावचनंभवतिविप्रतिषेधेन स्वनइट्प्रतिषेधस्यावकाशः अनाङ्पूर्वान्मनोभिधानं स्वांतं मनः वावचनस्यावकाशः आङ्पूर्वादमनोभिधानं आस्वांतोदेवदत्तः आस्वनितोदेवदत्तः आङ्पूर्वान्मनोभिधाने उभयंप्राप्नोति आ स्वांतंमनः आस्वनितंमनः वावचनंभवतिविप्रतिषेधेन॥ ॥हृषेर्लोमसु॥ ॥हृषेर्लोमकेशकर्तृकस्येतिवक्तव्यं हृष्टानिलोमानि हृ षितानिलोमानि हृष्टंलोमभिः हृषितंलोमभिः हृष्टाः केशाः हृषिताः केशाः हृष्टंकेशैः हृषितंकेशैः विस्मितप्रतिघातयोरितिवक्तव्यं हृष्टोदे वदत्तो हृषितोदेवदत्तः हृष्टादंताः हृषितादंताः॥ ॥अपचितश्च॥ ॥अपचितइति किंनिपात्यते चायश्चिभावो निपात्यते अपचितः क्तिनिनि त्यमितिवक्तव्यं अपचितिः

त्यशद्वं मत्वाकेशग्रहणं तत्कृतवांस्तथाचलोमनखंस्पृशतोर्शौचंकर्त्तव्यमित्युक्ते केशस्पर्शे पिशौचंक्रियते वार्त्तिककारस्तु मूर्द्धजाः केशाअंगांतरजानिलोमानीतिभेदंमत्वाह हृषेर्लोमकेशकर्त्तृकस्येति॥ ॥अपचि॥ ॥चिभावइति एतच्चोपलक्षणं इट्प्रतिषेधस्यापिनिपातनात् क्ति

भा॰के॰ ३९

आर्द्ध॰॥ ॥रुदादिभ्य एवेति॰ सार्वधातुक एवेति नियमस्तु रुदविदेति क्त्वासनोः कित्वविधानान्न भविष्यति अनिटः सनो रुदादेर्हलन्ताच्चेति कित्वस्य सिद्धत्वात्को
ऽपनिट् औपदेशिककित्वस्याभावात्॰ त्वम्यामिति॰ क्विबन्ता धातुत्वं न जहतीति रूपार्थवैकल्यात्॰ विहितविशेषणमिति॰ यद्यपि कृञ्चश्च धातोरित्यत्र धातुशब्दो

आर्द्धधातुकस्येड्वलादेः॥ ॥आर्द्धधातुकग्रहणं किमर्थं॰ यथा वलादिग्रहणमार्द्धधातुकविशेषणं विज्ञायेत वलादेरार्द्धधातुकस्येति
अथाक्रियमाणे आर्द्धधातुकग्रहणे कस्य वलादिग्रहणं विशेषणं स्यात्॰ अङ्गस्येति वर्त्तते॰ अङ्गविशेषणं॰ तत्र को दोषः॰ अङ्गस्य वलादे
रादितीट् प्रसज्येत॰ अजागृ॰ तद्यथा अजागरवं गस्यादिति न भवतस्त्वद्दत्॰ क्रियमाणेऽप्यार्द्धधातुकग्रहणे नैषः शक्यो विज्ञातुं व
लादेरार्द्धधातुकस्य यदङ्गमिति॰ अक्रियमाणे चेष्टमङ्गस्य यो वलादिरिति॰ किं वाङ्गस्य वलादिर्निमित्तं यस्मिन्नङ्गमित्येतद्भव
ति॰ कस्मिंश्चैतद्भवति प्रत्यये॰ यावता क्रियमाणे चानिष्टं विज्ञायते अक्रियमाणे चेष्टं तत्राक्रियमाण एवेष्टं विज्ञास्यामः॰ इदं तर्हि
प्रयोजनं॰ इह मा भूत्॰ आस्ते शेते॰ एतदपि नास्ति प्रयोजनं॰ रुदादिभ्यः सार्वधातुक इत्येतन्नियमार्थं भविष्यति॰ रुदादिभ्य एव
सार्वधातुक इड् भवति नान्येभ्य इति॰ एवमपि वृक्षत्वं वृक्षता अत्र प्राप्नोति॰ धातोरिति वर्त्तते॰ एवमपि लूभ्यां लूभ्यामत्र प्राप्नोति
एवं तर्हि विहितविशेषणं धातुग्रहणं धातोर्यो विहित इति॰ ननु च धातोरेवायं विहितः॰ न चायं धातोरित्येवं विहितः॰ क्व पुनर्धा
तुग्रहणं प्रकृतं॰ कृञ्चश्च धातोरिति॰ तद्वै षष्ठीनिर्दिष्टं पंचमीनिर्दिष्टेन चेह विहितं शक्यते विशेषयितुं॰ अथेदानीं षष्ठीनिर्दिष्टे
नापि विहितं शक्यते विशेषयितुं शक्यमार्द्धधातुकग्रहणमकर्त्तुं॥ ॥इति महाभाष्ये स
प्तमाध्यायस्य द्वितीयपादे प्रथममाह्निकं॥ ॥७॥

र्थपदार्थकस्तथापि सन्निधानाद्धातोरनुमानादित्यथा
तोरित्येतत्स्वरूपपदार्थकमाश्रीयते धातोरित्येवं विहितस्येति॰ पंचमीनिर्दिष्टेनेति॰ पंचम्यन्तानुकरणे धातोरित्यस्मिन्धातोरित्येवं विहितस्येति लभ्य
तेनान्यथा॰ अथेदानीमिति॰ धातुशब्देन धातुशब्दस्यानुकरणं तेन धातुशब्दस्य संबंधी यः प्रत्ययस्तस्येड्भवति यश्च धातुशब्दव्यापारे सन्नस्तत्संबंधी भवति॥ ॥

इति कैयटकृते भाष्यप्रदीपे सप्तमाध्यायस्य द्वितीये पादे प्रथममाह्निकं॥

शिव॰ ३९

=अन्यथा निषेधबाधकतया विधित्वमेवस्यादिडागमसंभवे विधेर्गमकत्वान्नतु नियमत्वं १ =अक्रावीत् अक्रमीदित्यादौ २= प्रस्नोषीष्ट क्रंसीष्टेत्यादौ ३= सुकइत्यादेर्बाधनार्थत्वं समानत्वात् पुंस्त्वादिति २= एवं च प्रतिषेधार्थमेवेदं सूत्रं न तु किदादौ विध्यर्थं ४=

सुग.नो.॥ ॥स्नुक्रमोः कृदान्तानादिटि सिद्धे नियमार्थं वचनं अनात्मनेपदनिमित्त एव इत्यथास्मादात्मनेपदनिमित्तत्वे माभूत्‌ कि ति सनि चक्रमोतें प्रस्नुनः प्रसुस्नूषतीति क्र
मेश्च निष्ठायां क्रान्त इति स्नुकः किती ति स निग्रहगुहोश्च यस्य विभाषेति निषेध एव पुंस्त्वात्प्रतिषेधस्य हेतदेव प्रयोजनं इणोत्स्य प्रतिषेधो यथास्यात्तेन प्रतिषे
धबाधनार्थमेतन्न भवति अथवा इधातुकस्येड्वलादेरित्यस्यानुवर्त्तनादयमर्थो भवति यत्र पूर्वेण इड्विहितस्तत्रैवानेन न भवति पूर्वसूत्रेण प्रतिषेधवि
षयपरिहारेण विधानात्तत्रैवायं विधिः प्रवर्त्तमानो नियमाय संपद्यते अथवा आत्मनेपदनिमित्तत्वे न भवतीति प्रसज्यप्रतिषेधे आश्रीयत इति
किदादौ न दोषः प्रस्नविते ति य एवात्मनेपदविषयः स्नौतिः स एवात्रापि योग्यताश्रयणेन निमित्तव्यवहारदर्शनादात्मनेपदनिमित्तं भवतीति इण =ननु कुर्द्यपता प्रयोगः २= =यथा कुलस्य प्रवीर्तेकु. २=
प्राप्नोतीति वचनं कर्मकर्तृविषयश्चायं स्नौतिरिति कर्मकर्त्र्यात्मनेपददर्शनात् भवति तद्योग्यः एवं प्रस्नवितुं प्रस्नवितव्यमिति भावकर्मविषयत्वाद्भावक

स्नुक्रमोरनात्मनेपदनिमित्ते॥ ॥स्नुक्रमोरनात्मनेपदनिमित्ते चेत्युपसंख्यानं कर्त्तव्यं प्रस्नुविता प्रस्नविता प्रस्नवितुं प्रस्नवितव्यं प्रक्रमि
ता प्रक्रमितुं प्रक्रमितव्यं तत्तर्हि वक्तव्यं न वक्तव्यं अविशेषेण स्नुक्रमोरिडागममुक्त्वा आत्मनेपदपरे इति वक्ष्यामि आत्मनेपदपरप्रति
षेधे तत्परपरसीयुडेकादेशेषु प्रतिषेधः आत्मनेपदपरप्रतिषेधे परसीयुडेकादेशेषु प्रतिषेधो वक्तव्यः तत्परपरे तावत्‌ प्रसुस्नूषिष्यते प्रचिक्रंसिष्यते सी
परप्रतिषेधेन
र्णयोरात्मनेपदोपलम्भादात्मनेपदनिमित्तं स्नौतिः प्रक्रमितेति आदिकर्मणोऽन्यत्र प्रयोगो विज्ञेयः आदिकर्मणि तु कर्त्तरि चात्मनेपदविषयात्क्रमतीति प्रतिषेधेन भाव्यं प्रक्र
मितुं प्रक्रमितव्यमिति भावकर्मविषयत्वात्तारम्भविषयत्वादात्मनेपदनिमित्तत्वं प्रसुस्नूषिष्यन इति आत्मनेपदपरः सः तत्परः स्नि इति स्यन्न व्यवहितत्वात्सन इ
ट् प्रतिषेधो न प्राप्नोति ननु च व्यवहितेऽपि परशब्दस्य वर्त्तमानात्प्रतिषेधो न विष्यति नैतदस्ति आत्मनेपदपरे ने ति न स्त्र न्यासः किं तर्ह्यर्थप्रदर्शनपरमेतत्स्नु
क्रमोर्नात्मनेपद इति सूत्रन्यासः न च तस्मिल्लिति निर्दिष्टे पूर्वस्येति परिभाषोपस्थानादव्यवहितस्य प्रतिषेधप्रसंगः ननु च सनिग्रहगुहोश्चेति प्रति
षेधो न विष्यति न सन्यनिडुधिः पूर्व प्रतिषेधविषय इति प्रागेवोक्तं यद्यप्युक्तमविशेषेणेति तस्यायमर्थः पूर्वसूत्रेण यः स्नुक्रमोरविशेषेणोक्तः तमन्त
घात्मनेपदपरप्रतिषेधो विधेयः एवं तर्हि प्रचिक्रंसिष्यत इत्येतदेवात्रोदाहरणं प्रस्नोषीष्टेति आत्मनेपदमेवात्र सीयुट् आर्द्धधातुकसीयुटस्तत्कृतत्वात्तत्ता

[illegible]

=प्रारम्भविषयत्वेहि भोपाभ्यां समर्थाभ्यामानिस्यात्मनेपदनिमित्तता प्रक्रमते उपक्रमत इत्यादौ वेदोपयोः समानार्थसलक्षणं सामर्थ्यं ५=

=नन्वेकादेशे प्रसक्तनिषेधः प्रवृत्तिः प्रकारांतरेणापि सिद्धः अस्तोप्यत इत्यादौ समग्रासमयोर्विधिनिषेधयोर्विधिबाधेन चरितार्थस्य निषेधस्य अस्तोप्यत इत्यत्रोकारीदेकादेशे प्रतिप्राप्यमाणस्य [illegible] ततः प्रागेव प्राप्तविधिबाधकत्वाभोगादत आह अत एवेति·तत्र ते

[illegible]

प्रस्तोप्यत इति· अचांतरंगत्वान्नित्यत्वाच्च पूर्वमेकादेशेन भाव्यमिट्प्रतिषेधस्तु बहिरंगो त्रिलक्ष्यश्च·या णर्दांगं बलीय इत्यनेन त्वेकनिमित्ताप्रवृत्तिर्वा णस्य प्रतिबिध्यते न तु भिन्ननिमित्तेति स्यादेवेडागमः॥ अंतरंगेवेद्यपि कर्त्तव्ये या णर्दांगं इत्यस्यानुपस्थानं· एकादेशः पूर्वविधाविति·ननु चार्द्धधातुकस्य इट्प्रतिषेध उच्यते न चार्द्धधातुकमेकादेशात्पूर्वं व्यपवर्गाभावात्·अत्राहुः पूर्वस्मादपि विधिः पूर्वविधिरिति समासाश्रयणाददोषः॥ प्रस्तविचीयत इति·तजंतात्क्यङ्सीङ्तत इतिरीङादेशः॥ बहिरंगलक्षणमिति·तजंतादाचारलक्षणे क्विप्यांतरेक्यङ्ततआत्मनेपदमिडागमस्तु पूर्वमेव तजंतावस्थायामुसन्तो नशक्यो निवर्त्तयितुमित्यर्थः॥ यद्येवं प्राचि कं सिष्यत इत्यत्रात्मने

एकादेशे प्रस्तोप्यंते प्रकंस्यंते· एकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति· अंतादिवद्भावेन व्यपवर्गः॥ उभयत आश्रयेनांतादिवत्·एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यपवर्गः॥ तत्र ऋरपरसीमुलोस्त इट्प्रतिषेधो वक्तव्यः॥ सिद्धं तु स्नोरात्मनेपदेन समानपदस्यस्येट्प्रतिषेधात्· सिद्धमेतत्·कथं· स्नोरात्मनेपदेन समानपदस्यस्यनेड्भवतीति वक्तव्यं·यदि स्नोरात्मनेपदेन समानपदस्यस्यनेड्भवतीत्युच्यते प्रस्नविनेवाचरति प्रस्नविचीयते अत्र न प्राप्नोति· बहिरंगत्वाच्च· बहिरंगलक्षणमात्मनेपदं· क्रमेश्च·क्रमेश्चात्मनेपदेन समानपदस्यस्येण्न भवतीति वक्तव्यं· अथ किमर्थं क्रमेः पृथग्ग्रहणं क्रियते न स्नुक्रमिभ्यामित्येवोच्येत·कर्त्तरि चात्मनेपदविषयात्कृति नेति वक्ष्यति तत्क्रमेरेव यथास्यात्क्लोर्मा भूत्·प्रस्नविता प्रस्नविताशे प्रस्नवितारः॥ कर्त्तरि चात्मनेपदविषयात्कृति प्रतिषेधः॥ कर्त्तरि चात्मनेपदविषयात्कृति प्रतिषेधो वक्तव्यः॥ प्रकंता उपक्रंता·तत्तर्हि इदं बहु वक्तव्यं स्नोरात्मनेपदेन समानपदस्यस्येण्न भवतीति वक्तव्यं क्रमेश्चेति वक्तव्यं कर्त्तरि चात्मनेपदविषयात्कृतीति वक्तव्यं·सूत्रं च भिद्यते·यथान्यासमेवास्तु॥

पदस्य बहिरंगत्वात्प्रतिषेधो न प्राप्नोतीति·नैष दोषः॥ समानपदस्यस्येति वचनादिडागमेन पदावस्थापेक्षणीया न तत्र चिविभक्त्याकुसन्नायां तच्येपि पदत्वे आत्मनेपदस्यासन्निधानादिडागमः प्रवर्त्तते·प्रचिक्रंसिष्यत इत्यत्र तु पदावस्थायामेवात्मनेपदसन्निधानात्प्रतिषेधप्रवृत्तिः॥ आत्मनेपदविषयादिति·तयोर्ण्यादित्यर्थः॥ प्रक्रंतेति·प्रारंभविषयात्क्रमेः प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदविषयत्वं॥

लुक्कमी एवेति· अनात्मनेपदनिमित्ते इति प्रथमा द्विवचनं ननु सप्तमी सप्तम्यां हि भावादेरात्मनेपदनिमित्तस्या[redacted]श्रयणं लसत्वितव्यमित्यादावपि प्रतिषेधः स्यात्· कथं पुनरिति· इत्या
दिरर्थ आत्मनेपदस्य निमित्तं न धातुरिति भावः॥ धातुरेवेति· इत्याद्यर्थ विशिष्टः॥ भावकर्मणोरित्यादिति· भावकर्मणोर्धातोरेव विषयभावेन विशेषणे इत्यर्थः॥ सत्यात्मनेपद
इति· न योग्यतामात्राश्रयमिह निमित्तत्वमाश्रीयते किंतु कार्यं कुर्वतः॥ यद्येवमर्थेपि निमित्तत्वेनाश्रीयमाणे दोषाभावात् कस्माल्लुक्कमी एवेत्युक्तं उच्यते· अर्थे निमि
त्तत्वेनाश्रीयमाणे नुपसर्गाद्वेत्यात्मनेपदमर्थनिरपेक्षत्वादसंगृहीतं स्यादिति धातुरेव निमित्तत्वेनाश्रितः॥ यदि सति कार्ये निमित्तमाश्रीयते तदा निमित्तम्

ननु चोक्तं लुक्कमोरनात्मनेपदनिमित्ते चेत् लसुपसंख्यानमिति· नैष दोषः॥ लुक्कमी एवात्मनेपदनिमित्तत्वेन विशेषयिष्यामः॥ न चेत् लुक्क
मी आत्मनेपदनिमित्ते इति· कथं पुनर्धातुर्नामात्मनेपदस्य निमित्तं स्यात्· धातुरेवात्मनेपदनिमित्तमित्याह· आह हि भगवाननुदात्तङित
आत्मनेपदं शेषात्कर्त्तरि परस्मैपदमिति· यत्र तर्हि धातुर्नाश्रीयते भावकर्मणोरात्मनेपदमिति· अत्रापि धातुरेवाश्रीयते भावकर्मणो
र्धातोरिति· कथं प्रक्रमितव्यं· सत्यात्मनेपदे निमित्तशब्दो वर्त्तते· कथं प्रक्रंता उपक्रंता· तस्मादसत्यपि· कथं प्रक्रमितव्यमुपक्रमितव्यं
तस्मात्सत्येव· कथं प्रक्रंता उपक्रंता· वक्तव्यमेतत्· कर्त्तरि चात्मनेपदविषयात्कृतीति· अथवा कृतीति वर्त्तते॥ ॥ग्रहोऽलिटि दीर्घः॥ ॥ग्रहे
र्दीर्घत्वे इड्ग्रहणं· रकर्त्तव्यं· इटो दीर्घ इति वक्तव्यं· न वक्तव्यं· प्रकृतमनुवर्त्तते· क्व प्रकृतमार्द्धधातुकस्येड्वलादेरिति· एवमपि कर्त्तव्यमेव॥

हणं न कर्त्तव्यं· आत्मनेपद इति सप्तमी सप्तम्याश्रयणात्· नैतदस्ति· तस्मिन्निति ||अकरणे ह्यसंप्रत्ययः षष्ठ्यभावात्· अक्रियमाणे हीड्ग्रहणे असंप्रत्ययः स्यात्·
निर्दिष्टे पूर्वस्येति परिभाषायां सत्यां सप्तम्याश्रयणस्याशक्यत्वात्· अथवा कृतीति वर्त्तत इति· तच्च कृद्ग्रहणं वा कस्मेदेन क्रमितैव संबध्यते न स्को तिना· अ
नात्मनेपदनिमित्त इति च प्रसज्यप्रतिषेधस्तेनायमर्थः॥ यदा ह्यात्मनेपदयोग्यः क्रमिस्तदा ततः परस्य कृत इडागमो भवति॥ ॥ग्रहो॥ ॥इड्ग्रहणमिति·
आदेशस्य स्थानिनिर्देशार्थं षष्ठ्यां इड्ग्रहणं कर्त्तव्यं· एवमपीति· सत्येव प्रथमान्त इड्ग्रहणे षष्ठ्यन्तमन्यत् कर्त्तव्यमित्यर्थः॥ अक्रियमाणे हीति· प्रथमान्तमिड्ग्रहणम्
सतीति
=आत्मनेपदे[illegible]सतीत्यर्थः॥४=
योग्यत्वान्न संबध्यते· अत्र परिभाषोपस्थानाभावान्नास्य ग्रहेः परस्य दीर्घप्रसंगः॥ असंप्रसार

इति· ग्रहेः परस्येटो दीर्घ इत्ययमिडः संप्रसारयो न स्यात्॥ ॥

=अनुवृत्तं चारेत्याकर्त्तेपदं स्वत्संज्ञकप्रमयपदं चैतेन प्रक्रमितव्यमित्यादेनदोषः॥४=

तीर

क्रियमाणेइ ति·प्राकरणिकमिटं नपेक्ष्येटइत्युच्यमानेसर्वस्येटो विशेषाभावादीर्घप्रसंगाच्चिण्वदिटोदीर्घप्रतिषेधः। जरीगृहितेति·जरीगृहप्रशान्तेरूदइअ
ल्लोपयलोपयोः कृतयोर्द्विःप्रयोगो द्विर्वचनमितिसरवयहिदिटोदीर्घप्रसंगः। दीर्घविधौ स्थानिवत्त्वनिषेधादकारे ण्व्यवधानाभावः। यदिपुनरिति·इडि तिव
र्ततेदीर्घ इतिनिर्द्दिश्यते तत्रदीर्घइड्भवतीतिसामर्थ्याद्व्यक्तिपरित्यागेनेकारजातिराश्रीयते दीर्घग्रहणाच्च दीर्घव्यक्तिसमवेतासाविधीयतेटकारोदेशविध्य
र्थइतिसामर्थ्यादीडागमविधिः एवंचषष्ठीनिर्द्दिष्टमिड्ग्रहणंनकर्त्तव्यं·चिण्वदिड्वास्यापवादइतितत्र दोषाभावः। नचकस्यचित्स्थानिनो दीर्घत्वं विधीयतइ
तिस्थानिवत्त्वानिषेधात्पूर्वस्मादपिविधौ स्थानिवत्त्वादकारेणव्यवधानाद्यल्लोपेईटो प्रसंगः। अथत्वागमान्तरेपि दीर्घत्वमस्त्येवायं दीर्घविधिस्तदाय

किंकारणं·मध्यमाभावात्·षष्ठीनिर्द्दिष्टस्यादेशउच्यं तेनचात्र षष्ठीपश्यामः। क्रियमाणेचापीड्ग्रहणे चिण्वदिटः प्रतिषेधो वक्तव्यः। ग्रा
हिष्यते·यल्लोपेच प्रतिषेधोवक्तव्यः। जरीगृहिता·जरीगृहितुं जरीगृहितव्यं·यदिपुनरिड्आगमान्तरं विज्ञायेत·इड्दीर्घइतिचेद्विप्र
तिषिद्धं·इड्दीर्घइतिचेद्विप्रतिषिद्धं भवति·यदीण्नदीर्घः अथदीर्घोनेट्·इड्दीर्घश्चेति विप्रतिषिद्धं· प्रतिषिद्धस्यपुनर्विधानेदीर्घत्वाभा
वः। प्रतिषिद्धस्यचपुनर्विधानेदीर्घत्वस्याभावः। बुभूर्षते विवरिष ते विवरीषते· अत्रापीड्दीर्घइत्यनुवर्त्तिष्यते·य र्हिविदेश
स्यप्रतिषिध्यपुनर्विधानं तन्नसिध्यति· ज्ञप्त्रयोः क्त्विश्रुकः किती सनेनप्रतिषिद्धेदीर्घत्वं न प्राप्नोति·जरीता·

ल्लोपेरेकोनपरिहृतः। इतरोव्यक्तिपदार्थाश्रयेणाह·इड्दीर्घइतिचेदिति·विवरीषतइति·सनीवन्ध्रग्रहेत्युभोवेत्यनेनपक्षेईटचप्रसक्तेसनिग्रहगुहोश्चेसनेनोभयस्मिन
पिप्रतिषिद्धेइट्सनिवेतिपक्षेइड्विधीयते ततःपुनरीटोविधानाभावादीर्घईकारःपक्षेनश्रूयेत·इट्स्तुपक्षेदीर्घविधौ दोषाभावः। अत्रापीति·इट्सनिवेसत्रदी
र्घइतिवृतइतिचानुवर्त्तनइतिसिद्धंत्रैरूप्यं·विदेशस्यमिति·दीर्घग्रहणमनुद्धनेरत्राभंसंभवः। जरीतेति·उदात्तत्वादिट्प्राप्तोवृतोवेसनेनर्ईट्वश्रुकः
किती·तिप्रतिषिद्धःईकारजातसाश्रयणाईटोपिप्रतिषेधःप्रवर्त्तते ततोज्ञप्त्रयोः क्त्वीसनेनइटि विधीयमानेपक्षेदीर्घोनस्यात्॥ ॥७॥ ॥७॥ शिवः
४१

पसे·

एतस्य निहरति॰ ईटो विधिरिटः प्रतिषेध इति॰ हृतोवेत्यनेन पक्षे ईडागमो विधीयते श्युकः कितीत्यनेन तु नेडित्यधिकारात्क्तिप्रत्याश्रयणाच्च निषेध इटो न तीटः। पाठान्तरं तु प्रकृ
तेर्थे दुर्योजत्वादस्माभिर्नोपन्यस्तं॰ सन्मार्गसंभवे को हि विमार्गमतिमान्भजेत्॰ यदि तर्हीति॰ इट्प्रतिषेध इटो यथा न भवत्येवं कार्यान्तरस्याप्यप्रसंगः। तस्मान्नेत दिति॰
इड्ग्रहणे इकारा कृतिराश्रयणीया न तु व्यक्तिः। भवति चेदिति॰ जग्रभ्याः क्तीति द्वौ दोषमेवेत्यर्थः। नन्वनुवादस्त्व विधावपीकारान्तत्वाश्रयणाज्जग्रदिता जरीत्येति रूपद्व

ईटो विधिरिटः प्रतिषेधो यथा प्राप्नं इट्दीर्घो न विष्यति॰ यदि तर्हीटो ग्रहणे ईटो ग्रहणं न भवति जरीतान क्तासेडिति किल प्रतिषेधो न प्रा
प्नोति॰ इह चाग्रहीदिति इट ईटीति सिज्लोपो न प्राप्नोति॰ इह चाग्रहीत्वेनेटीति वृद्धिप्रतिषेधो न प्राप्नोति॰ मा भूदेवं त्यन्तानामित्येवं न विष्यति
अत्रापि नेटीत्येवानुवर्त्तते तत्रावश्यमिड्ग्रहणे नित्यनुवर्त्यमथाग्रहीदित्येवमर्थं तथा अग्रहीध्वमग्रहीढ्वं विभाषेट इति मूर्द्धन्यो न प्राप्नोति॰ तस्मा
न्नेतच्छक्यं वक्तुं इटो ग्रहणे ईटो ग्रहणं न भवतीति न वति चेत्यतिषिद्धस्य पुनर्विधाने दीर्घत्वाभाव इत्येव॰ तस्मादशक्य इड्दीर्घ आगमान्तरं वि
ज्ञातुं न चेद्विज्ञायते इटो ग्रहणं कर्त्तव्यं न कर्त्तव्यं॰ आर्द्धधातुकस्येति वर्त्तते॰ ग्रहः परस्यार्द्धधातुकस्य दीर्घत्वं वक्ष्यामि॰ इहापि तर्हि प्राप्नोति॰ ग्रहणं
ग्रहणीयं॰ वलादेरिति वर्त्तते॰ एवमपि ग्रहीता ग्रहीतुमत्र न प्राप्नोति॰ अतपूर्वगत्वान्न विष्यति॰ एवमपि ग्राहकः अत्र प्राप्नोति॰ किं च इ
ट्प्रतिघातेन खल्वपि दीर्घत्वमुच्यमानं मिटं बाधेत तस्मादिटो ग्रहणं कर्त्तव्यं न कर्त्तव्यं प्रकृतमनुवर्त्तते क्व प्रकृतमार्द्धधातुकस्येड्वलादे
रिति॰ ननु चोक्तमेवमपि कर्त्तव्यमग्रहणे स्य संप्रसयः षष्ठ्यनिर्द्देशात्स्विति॰ नैष दोषः। ग्रह इत्येषा पंचमी इडिति प्रथमायाः षष्ठीप्रकल्पयि
ष्यतीत्यस्मादित्युत्तरस्येति॰ एवं च कृत्वा सोप्यदोषो भवति यदुक्तं चिण्वदिटः प्रतिषेध इ
यं न विष्यति॰ नैतदस्ति॰ विधौ जातसाश्रयेत्सविते सादावपि दीर्घः॥
स्यात्तस्मादिडितस्य दीर्घस्येड्ग्रहणेन ग्रहणं न तु विधेयस्य॰ ग्रह इति॰ इडागमे कृते तदाश्रयत्वादार्द्धधातुकस्यादेः परस्येति इट एव दीर्घः। वलादेरिति॰ वलादित्यपहृष्टमित्याश्री
यते॰ इतरः सांप्रतिकं वलादित्वमाश्रिसाह॰ एवमपीति॰ अतपूर्वगत्वेति॰ सांप्रतिकाभावादलिटीति प्रतिषेधाच्च॰ इट्प्रतिघातेनेति॰ येन नाप्राप्तिन्यायेनेटं बाधित्वा कृते

भा॰के॰

४२ नचेति॰ जुहुधत्योश्चश्लौ सनेन ननु चला दिलक्षण एवेह प्रतिप्रसत्य नइत्याप्राकरणिकत्वाभावाद्दीर्घः सिध्यति॰ यङ्लोपे चेति॰ सन्यङं तस्यस्याने द्विर्वचनमित्यस्मिन्पक्षे प्रकृतिप्रत्यय

सम्मोहात्लक्षः सम्प्रहिः॥ ननुच द्विः प्रयोगो द्विर्वचनमिति पक्षस्तत्र स्थितस्तत्कथमस्थितपक्षाश्रयेण परिहारः॥ अत्राहुः॥ यङ्लोपे चोक्तमित्यत्रायमभिप्रायो वार्त्तिककारस

द्विः प्रयोग एव द्विर्वचने पूर्वस्मादपि विधावल्लोपस्य स्थानिवत्त्वादकारेण व्यवधानाद्दीर्घाभावः॥ नपदान्तेत्यत्र पूर्वत्रासिद्धेन स्थानिवदिति वक्तव्यं तस्मिन्नुच्यमाने पदान्त

वरेयल्लोपस्वरवर्जं द्विर्वचनादीनि न वक्तव्यानीति सामान्यके दीर्घविधौ स्थानिवत्त्वं भवत्येव॰ सूत्रकारमतेपि ग्रहे विहितस्येत्येवं विहितविशेषणाश्रयणा यङ्लोपे दी

र्घाभावसिद्धिः॥ भाष्यकारेण तु स्थितमपि पक्षमाश्रित्य तदन्त द्विर्वचनादिति विवृतं अन्यथास्य दोषस्य सम्यक्परिहाराभिधानादनादरात्॥ ॥स्वरतिसूति॰॥ ॥अथे =एकाचो द्वे इत्यत्र २=

ति॰ इङ्सनिवेसतः॥ लिङ्सिचोर्निर्दिष्टस्यार्थमिति॰ ननु स्वरतिग्रहणं क्लिङ्सिचोरनुवृत्तिर्न भविष्यत्यृतश्च संयोगादेरिती द्विकल्पस्य सिद्धत्वात्॰ नैतदस्ति॰ नित्यार्थं स्व

नचैवं दिङ्प्रकृतः॥ यङ्लोपे कथं॰ यङ्लोपे चोक्तमिति सर्वत्र॰ क सर्वत्र यत्रैव प्रकृतस्येटो दीर्घत्वमथापि इड्दीर्घ आगमान्तरं विज्ञायते॰ यङ्लोपे

चोक्तं किमुक्तं तदन्त द्विर्वचनादिति॰॥ ॥स्वरतिसूति॰॥ ॥अथ वेति वर्त्तमाने पुनर्वावचनं किमर्थं॰ पुनर्वावचनं लिङ्सिचोर्निर्दिष्टस्यार्थं॰ पुन

र्वावचनं क्रियते लिङ्सिचोर्निर्दिष्टस्यार्थं॰ अथ किमर्थं स्तृतिस्तृयस्योः पृथग्ग्रहणं क्रियते स्रुवतेर्मा भूदिति॰ अथ किमर्थं धूञः सानुबन्धकस्य ग्र हणं

रतिग्रहणमित्यज्ञापकं लिङ्सिचोर्वृत्तेः॥ अथ किमर्थमिति (हणं क्रियते धुवतेर्मा भूदिति॰ किं पुनरियं प्राप्ते विभाषा आहोस्विदप्राप्ते कथं च प्राप्ते कथं

स्वग्रहणं क्रियतामिति भावः॥ स्रुवतेरिति॰ अननुबन्धकग्रहणे न सानुबन्धकस्येति स्रुवतेरेव ग्रहणं स्यात्स्तृग्रहणेपि क्रियमाणे लुग्विकरणालुग्विकरणयोरलुग्वि शिवः

करणस्यैव ग्रहणमिति स्तृयतेरेव ग्रहणं स्यात्॰ अस्याश्च परिभाषायाः स्तृग्रहणे कर्त्तव्ये स्तृतिस्तृयतीति भेदेनोपादानमेव ज्ञापकं॰ धूञ इति॰ धूञ्कम्पने इति स्वादौ

क्र्यादौ च पठ्यते इति द्वयोरपि सामान्येन ग्रहणं॰ धु विधूनने इत्यस्मात्तु नित्यमिड् भवति॰ किं पुनरिति॰ स्वरत्युद्देशेनायं विचारोन्येषां तूदात्तत्वात्प्राप्ते विभाषा नित्यप्रा ४२

दोषाभावाच्च॰ स्वरतेस्तूदात्तानुदात्तत्वप्रतिज्ञाने दोषदर्शनाद्विचारः॥ कृतां च स्वृ इत्यविति परिगणनादस्योदात्तत्वं न प्रतिज्ञातं॰ तत्र किमुदात्तत्वप्रतिज्ञानेन दो

षः परिह्रियते अथानुदात्तत्वप्रतिज्ञानेन्यायेनेति प्रश्नः॥

=ननुसते॥ ३=

यदिस्वरतिरुदात्तइति॰ ननु क्ङिति प्रसये श्रुकः किती ति प्रतिषेधात्त आद्यान्ते विशेषेयं स्यात्॰ नैतदस्ति॰ अल्पविषयत्वप्रसंगात् स्वरतेः आम विशेषायां तु मर्त्यविशेषेयं भ
वति॰ किमर्थमिति॰ यदि पक्षे इण्निरसर्थं तदा कथं नोऽस्य इतीममपीदं पक्षे निवर्त्तयेदिति प्रश्नः॥ निरसर्थमिति॰ निरस्तिः कंचिदेव विधिं बाधते न सर्वमिति भावः॥ स
विधिरिति॰ कथं नोऽस्य इत्येषः॥ अयं प्रतिषेध इति॰ आम विशेषापक्षे यथा वलादिलक्षणइट् प्राप्तो निषिध्यते तथा स्वलक्षणोपि प्रतिषिध्येत॰ अनुदात्तविज्ञाने तु इमौ
रपि विधित्वाद्विप्रतिषेधोपपत्तिः॥ सोपीति॰ चेधर्म्मेण दृष्टांतः॰ यथा मृदुकार्पाससूत्रैः रज्ज्वादिर्दुर्बलो नैवं कथं नोऽस्य इत्ययं विधिः॥ सयथैवेति॰ कश्चिद्यतीसादे॰

यदिस्वरतिरुदात्तस्ततः आद्ये अथानुदात्तस्ततोऽन्त्ये॰ स्वरतिरुदात्तः पक्षे किमर्थं तर्हि वावचनं॰ वावचनं निरसर्थं॰ वावचनं क्रियते
निरसर्थं॰ अनुदात्ते हि क्ङिति वा प्रसंगः प्रतिषिध्य पुनर्विधानात्॰ अनुदात्ते हि क्ङिति सति पुनर्विभाषा प्रसज्येत तस्मात् किंकारणं॰ प्र
तिषिध्य पुनर्विधानात्॰ प्रतिषिध्य किलायं पुनर्विधीयते॰ सयथैवैकाज्लक्षणं बाधते एवं श्रुकः किती त्येतमपि बाधेत॰ यदितद्
दात्तः पक्षिष्यति विप्रतिषेधं स्वरतेर्वेट् इत्यादतः स्ये विप्रतिषेधेनेति तन्नोपपद्यते॰ किंकारणं॰ सविधिरयं प्रतिषेधः विधिप्रतिषे
धयोश्चायुक्तो विप्रतिषेधः॥ सोपि विधिर्नेमइत्यामिवकार्पासानां कृतः प्रतिषेधविषय आरभ्यते॰ अपवायेन नाप्राप्ते तस्य बाध
नं भवति॰ न चाप्राप्ते वलादिलक्षणे इयं विभाषा आरभ्यते स्य लक्षणे पुनः प्राप्ते चाप्राप्ते च॰ अपवादमध्ये पठिता दाः पूर्वान्विधीन्बाधं ते इत्ये
वमियं विभाषा वलादिलक्षणमिटं बाधिष्यते स्य लक्षणं न बाधिष्यते॰ अथवा पुनरस्त्वनुदात्तः॥ ननु चोक्तमनुदात्ते हि क्ङिति वा प्रसंगः

×सयथैवैकाज्लक्षणं प्रति×
×मर्थं बाधते एवमिममपि×
×बाधते××

एवमिममपीति॰ न च स्वरतेरुदात्तत्वे येन नाप्राप्तिन्यायो स्ति येनैकाज्लक्षणमेव प्रतिषेधं बाधेत न स्वरतिलक्षणं॰ यद्येवं विप्रतिषेधानुपपत्तिः स्यलक्षणस्य विधेस्तप
वादत्वादन्यथापीट् स्यासिद्धत्वोपपादि विप्रतिषेधः अथवा सविधिरयं प्रतिषेध इति विधेर्दुर्बलत्वं यदुक्तं तदनेन निराकृतं तत्र द्वयोस्तुल्यबलत्वादुपपद्यते विप्रतिषेधः
अथवेति॰ परिभाषाश्रयणादुत्सर्गाभावे पतीतस्वयोर्विप्रतिषेधोपपत्तौ परत्वेन व्यवस्था॰ उदात्तत्वे दोषं प्रतिविधायानुदात्तत्वे दोषं प्रतिविधत्ते॰ अथवेति॰॥ ॥

=येन नाप्राप्ते इति मध्ये पठिता दा इति चेत्सर्थः॥ १९=

भा॰कै॰
४३

नचाप्राप्ते एकाज्लक्षणे इति॰ अयमेव पाणेरुक्तः॥ केचित्तु वलादिलक्षण इति पठंति॰ वलादिमात्रविषयत्वा द्वलादिलक्षणश्चात्र बाध्यते॰ श्युकः किती त्येतस्मिन्निति॰ तत्र सत्येव सत्रो भयप्रसंगे पूर्वविप्रतिषेधो भवतीति वक्तव्यं॰ येम्यश्चानुदात्तेभ्य इति॰ प्रतिषेधकांडस्य पुरस्तात्करणस्य सर्वे इट्प्रतिषेधार्थतात्॰ मध्य मिति॰ यधुम्लक्षणं प्रतिषेधमध्यं विकल्पो बाधेत ततः स नियम्यत इत्येवं स स्य प्रतिषेध ... स्याभावादनेनैव सति विकल्पस्य सिद्धत्वात्सुनस्त्वन्न विरुध्यात्॥ ॥इणि॥ ॥सिद्धेति॰ नि

नैष दोषः॥ येन नाप्राप्ते तस्य बाधनं भवति न चाप्राप्ते एकाज्लक्षणे प्रतिषेधे इयं विभाषारभ्यते श्युकः किती त्येतस्मिन्पुनः प्राप्ते चाप्राप्ते च॰ अथवा श्युकः किती त्येष योग उदात्तार्थश्च येभ्यश्चानुदात्तेभ्य इट्प्राप्यते तद्बाधनार्थश्च॰ अथवा श्युकः कितीत्येतन्नुवर्त्तिष्यते॰ अथवा आचार्यप्रवृत्ति र्ज्ञापयति नेयं विभाषोऽक्लक्षणस्य विषये भवतीति यदयं सनीवंतर्द्धभ्रस्ज श्रिस्वृयूर्णुभरज्ञपिसनामिति स्व ग्रहणं करोति॥ ॥इणि ष्ठा यां॥ ॥इडिति वर्त्तमाने पुनरिड्ग्रहणं किमर्थं॰ निसार्थोयमारंभः॥ नैतदस्ति प्रयोजनं॰ सिद्धात्र विभाषा पूर्वेणैव तत्रारंभसामर्थ्यान्नित्यो विधिर्भविष्यति॰ नात्र पूर्वेण विभाषा प्राप्नोति॰ किं कारणं॰ यस्य विभाषेति प्रतिषेधात्तत्रारंभसामर्थ्याद्विभाषा लभ्येत पुनरिड्ग्रहणादिडे व भवति॥ ॥तीषसह॥ ॥इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः॥ इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधो वक्तव्यः॥ इरमात्त्वत् एषिता एषितुं एषितव्यं॥ ॥वसतिक्षुधोरिट्॥ ॥इडिति वर्त्तमाने पुनरिड्ग्रहणं किमर्थं॰ पुनरिड्ग्रहणं निसार्थं॰ इडिति वर्त्तमाने पुनरिड्ग्रहणं क्रियते नि सार्थं॰ निसार्थोयमारंभः॥ ॥७॥

रः कुषइसनेन॥ ॥तीषसह॥ ॥इषुइच्छायामिति केचित्तोदादिकमुदितमभिधीयते अन्ये त्वदिलस्य प्रयोजनमपश्यंत इष इच्छायामिति पठंति॰ ये त्विह तीषुसहेति पठंति तन्मते नेह विशेषणार्थ उकारस्तत्रवार्त्तिककारमते च योपीषयोननुबंधका इह च तीषसहेति पाठस्तदाह॰ इषेर्निर्दि ष्टस्य आभीक्ष्ण्ये इत्यस्य क्रैयादिकस्य तु विकल्पमिच्छति वार्त्तिककारः तौदादिकस्य तु उदित्वमुपगम्यमाने तीषसहेति पाठे अननुबंधकपरिभाषया क्रैयादिक स्यैव ग्रहणं स्यात्॰ इरमात्त्वदिति॰ विकल्पः तेन इषगता विसस्मात्तकारादेर्निसमिड्भवति॥ ॥५॥

शिव॰
४३

=परस्मैपदेपरे इसमर्थे उनलुमनेतिनिषेधेन न स्यदित्याशयात्स्माद्दिति भावः ॥ २= भाष्ये ततीलुपसंख्यानं २=

गमेः ॥ ॥ सिद्धं त्विति । इत्युक्ते जिगमिषितेत्यत्र इतिजिगमिषिष्यतेइति बहिरङ्गत्वादात्मनेपदस्याप्रतिषेधाभावः ॥ केचित्तु योगविभागेनेष्टसिद्धिमाहुः । गमेः सकारादाविड्भवतीत्येको योगः ततः परस्मैपदेष्विति द्वितीयो नियमार्थः । तुल्यजातीयत्वाच्च नियमस्यात्मनेपदविषय एव निवर्त्स्यत इति कृतिपरस्मैपदत्वं किं

एवमपीति· विशेषस्य निश्चेतुमशक्यत्वात्प्रमाणाभावात् साकच्कार्थं इति· सर्वस्य साकच्कस्य कादेशो यथा स्यादित्येवमर्थं किमः कइति कर्तव्यं· तेनाज्ञाताद्यर्थविवक्षायां कइत्येव भवति न तु ककइति· ननु निर्दिश्यमानस्यादेशा भवंतीति साकच्कस्य कादेशो न प्राप्नोतीति· नच यः कोवकुं किमः कइति वचनसामर्थ्याद्भवतीति· किमइति स्यादिनिर्देशस्यानन्तरार्थत्वात्· एवं तर्हि तंत्राश्रयणात्साकच्कस्यापि भविष्यतीत्यदोषः॥ ॥कोति॥ ॥किमर्थमिति· कुभावे कृते अंगरूत इति वचनाद्गुणो न भवति· यणादेशस्त्वनांगत्वाद्भविष्यतीति भावः। न सिध्यतीति· निमित्तत्वस्य दुर्ज्ञानत्वात्॥ ॥तदोः॥ ॥किमर्थमिति· विशेषण

एवमप्यनैकांतिकं ज्ञापकं एतावत्तु ज्ञाप्यते न सर्वेषां त्यदादीनामत्वं भवतीति न च कुत एतद्विपर्यंतानां भविष्यति न पुनर्युष्मदस्मदंतानां वा स्यादभवदंतानां वा· किंचावश्यं खल्वप्युत्तरार्थं किमो ग्रहणं कर्तव्यं कुतिहोः क्वातीति· कादेशः खल्वप्यवश्यं साकच्कार्थो वक्तव्यः। कः को कइत्येवमर्थं· तस्माद्विपर्यंतानामत्वं वक्तव्यं· त्यदादीनामकारेण सिद्धत्वाद्युष्मदस्मदोः। शेषे लोपस्य लोपेन ज्ञापनेप्राकृतोदिति अपि चोपसमस्तार्थमत्वाभावात्कृतं भवेत्· द्विलोपश्चावभावार्थः कर्तव्य इति तत्कृतं अथवा शेषसप्तम्यां शेषे लोपो विधीयते· लुप्तशिष्टहितस्याद्रुः कार्यसिद्धिं मनीषिणः॥ ॥कोति॥ ॥किमर्थं कादेश उच्यते· न कुतिहात्विसेवोच्येत· कारूपासिद्धिः। कुः यणादेशेन सिद्धं· न सिध्यति· ओर्गुणः प्रसज्येत॥ ॥तदोः सः सावनंत्ययोः॥ ॥किमर्थमनंत्ययोरित्युच्यते· अंत्ययोर्माभूदिति· नैतदस्ति प्रयोजनं· अत्वमंत्ययोर्बाधकं भविष्यति· अनवकाशा विधयो बाधका भवंति· सावकाशं चात्वं कोवकाशः द्विशब्दः। सत्वमपि सावकाशं· कोवकाशः अनंत्यं॥ ॥

विशेष्यभावे कामचारात्त्यदादीनां च द्विपर्यंतानां मध्ये नकारांतस्य कस्यचिद्संभवात्त्यदादिभिर्विशेषितयोस्तदोः सत्वं विधीयमानमनंत्ययोः सावकाशमंत्ययोरत्वेन बाधिष्यत इति प्रश्नः। अंत्ययोरिति· परत्वात्प्राप्नोति न कारस्यांत्यस्यासंभवेपि सत्त्वे छंदो रूपादानादंत्ययोरित्युक्तं· नैतदस्तीति· पूर्वविप्रतिषेधमाश्रित्य चोदयति· द्विशब्द इति· उदाहरणमात्रमेतत्· अन्यत्रसोः सर्व एव त्यदाद्यवकाशः। सत्वमपीति उभयोः सावकाशयोः परत्वात्प्रसंगः॥

=सर्वविप्रतिषेधात्=

=अथवेत्यादिपक्षद्वयेपि कथंपुनरित्यादिग्रंथः सिद्धांतिन इति विशेषः। तृतीयेवक्ष्यमाणमाक्षेपं हृदि निधाय सिद्धांती पर्यनुयुंक्ते इति द्वितीयाद्विशेषः॥=

गो॰के॰ कथंपुनरिति॰ आचार्यदेशीयः शिष्यबुद्धिपरिज्ञानाय पृच्छति॰ समुदायावयवसन्निधावुभयोरनुग्रहणार्थं येन समुदायो विशेष्यते एवं हि समुदायस्यापि कार्ये
५५ ण संबंधः प्रतिपादितो भवति॰ अत्वोऽसस्येति वचनादवयवस्यापि॰ भवेदिति॰ व्याप्तिन्यायाश्रयणात्तकारांतासंभवाच्च सप्तादिभिः न दो विशेष्यते॰ एव
मपीति॰ सिद्धांतवादी॰ अथवा सत्वमपीति चोदकस्य ग्रंथः स च पूर्वविप्रतिषेधं मन्यते॰ कथंपुनरिति चोदकमाचार्यो बुद्धिपरीक्षार्थं पर्यनुयुंक्ते॰ भ
वेदिति चोदकः एवमपीत्याचार्यः। अथवा कथंपुनरित्यस्यायमर्थः। अनंत्यस्यैव कथं सत्वं लभ्यते यावतांत्यस्यापि परत्वात्प्राप्नोति॰ चोदकस्त्वगृही
ताभिप्राय आह॰ भवेदिति॰ आचार्यः स्वाभिप्रायमाह॰ एवमपीति॰ किंच स्यादिति॰ अंत्यस्यापि दस्य सत्वे हल्ङ्यादिलोपेन सद्ध्यादीनि सिध्यंती

कथंपुनः सत्यसे अनंत्यस्य सत्वं स्यात्॰ भवेद्यस्तकारदकाराभ्यामंगं विशेषयेत्तस्यानंत्ययोर्न स्यात्॰ वयंतु खल्वंगेन तका
रदकारौ विशेषयामः। एवमप्युभयोः सावकाशयोः समवस्थितयोः परत्वात्सत्वं प्राप्नोति॰ किंच स्यात्॰ यद्यंत्ययोः सत्वं
स्यात् हे सदृशति एड्ह्रस्वादिति संबुद्धेर्लोपेन स्यात्॰ इदश्चेयास्माः अत इति टाप्न स्यात्॰ न स्यादनंत्ययोरिति वक्ष्यंनवक्त
व्यमेवं वक्ष्यामि॰ तदोः सः सौ॰ ततः अदसः। अदसश्च दकारस्य सो भवतीति॰ इदमिदानीं किमर्थं नियमार्थं अदस एव दका
रस्य नान्यस्य दकारस्येति॰ यदि नियमः क्रियते दीयते रप्रत्ययः द इति प्राप्नोति स्व इति चेष्यते॰ यथालक्षणमप्रयुक्ते॥

निमत्वाप्रभः लोपेन स्यादिति॰ सत्वे सति हस्वांतत्वाभावात्॰ ननु सदाघत्वे पि कृते सन्निपातपरिभाषया संबुद्धिलोपाप्रसंगः। अनित्यत्वादस्याः परि
भाषायाः नायं दोषः। इदश्चेति॰ नयास्मयोरिति लिंगमाश्रीयमाणे अनेकोर्थः कल्पनीयः स्यात्॰ ततोदस इति॰ तत्रंतदोः सः साविति वर्तनेन तकारो शिवः
संभवात्सज्यते॰ दीयते रिति॰ द्वाविषदितिदीयति ततः क्विप् अकारयकारयोर्लोपाः ततः साविकारस्य सदाघत्वे सति स्व इति तद्भावे तु द इति प्रा
प्नोति॰ यथालक्षणमिति उपसर्जनत्वान्नात्र त्यदादिकार्येण भाव्यमिति॰ अथवाप्रयुक्तान[redacted]म्नाख्यानारंभाद्दिशाद्दस्य च कर्मजं तस्य क्विपि प्रयोगाभावान्नकेनचि ५५

द्दीदिसेव भवति॰२

अदसओ॥ ॥अदस इति अदसः परस्य सोरौत्वं विधीयते तन्न सर्वत्रादेशे ह्रस्वादि सिध्यति॰ ह्रस्वादिति यदि त्यदाद्यत्वं क्रियते त
दा सान्तत्वात्संबुद्धिलोपप्रसंगः तस्मादौत्वं सुलोपो विधीयते॰ नरुलइति॰ नायं दोषो यस्मात्सोरुलोलोपो विधीयते तेनौकारस्य न भविष्यति हे अ
साविति॰ अत्वे टापि च सति यावर्ण्णान्तांगं बलीय इति टिड्रेचौ इति द्विमेकादेशं बाधित्वा आङि चाप इत्येत्वं प्राप्नोति॰ प्रश्लिष्टनिर्देशो यमिति॰ आ

अदसऔ सुलोपश्च॥ ॥अदसः सोर्भवेदौत्वं किं सुलोपो विधीयते॰ अदस एव सोर्भवेदौत्वं कि[ ]मर्थं सोर्लोपो विधीयते
ह्रस्वात्सुलोपेन संबुद्धिः इह हे असाविति एङ्ह्रस्वादिति संबुद्धिलोपः प्रसज्येत॰ न हलः हल्लो लोपः संबुद्धिलोपः तद्ग्रहणं क
र्त्तव्यं॰ न कर्त्तव्यं॰ प्रकृतं हि तत्॰ प्रकृतं हल्ग्रहणं॰ क प्रकृतं॰ हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति॰ तद्वै प्रथमानिर्दिष्टं षष्ठीनि
र्दिष्टेन चेहार्थः ह्रस्वादिसेषा पंचमी हलिति प्रथमायाः षष्ठीं प्रकल्पयिष्यति तस्मादित्युत्तरस्येति॰ आप एत्वं भवेत्तस्मिन्॰ इह
हे असौ ब्राह्मणि आङि चापः संबुद्धौ चेत्येत्वं प्रसज्येत॰ न ङ्लीस[ ]नुवर्त्तनात्॰ ङ्लीति तत्रानुवर्त्तते॰ क प्रकृतं॰ सुपि च ब
हुवचने ङ्लत्येदिति॰ प्रत्ययस्थात्ककादित्वं इह च असको ब्राह्मणीति प्रत्ययस्थात्कात्पूर्वस्येतीत्वं प्रसज्येत॰ नैष दोषः। प्रश्लि
ष्टनिर्देशोयं॰ आ आविति॰ इहापि न हि [redacted] न प्राप्नोति॰ कारिके हारिके इति॰ =तस्मादेष दोषस्तेष प्रतिभाषः॥९=

कारस्यापि आनत्चेत्वं भवतीह तु टाप्रोक्ताया ओकाररूपं॰ कारिके इति॰ ओङः आप इति श्रीमाव आकुएे च कृते एकारः॥ अपत इतीत्वं न प्राप्नोति॰ संबुद्धौ वाका
रिके इति रूपं॰ ननु चायं तरंगवा आकुबुसने रित्वं न भविष्यति॰ असकाविसत्तुभाकबुसन्ते सामर्थ्यात्॰ एवं तर्हि टापि कृते एकादेशान्तस्य वर्णग्रहणांगं बली
य इतीत्वं प्राप्नोतीति आकाररूपएवाविति किं प्रश्लेषनिर्देशेन तस्मात्सामर्थ्याद्यथावर्ण्णग्रहणमिति बाधित्वैकादेशो न भवत्येवं कारिके सत्याप्यं न रंगे सास्पूर्वविभक्तित
[redacted]

=समानाश्रयश्चेदमिलनतुनमानं॰९=

श्रीभावश्चेति· ओ᳟ऽ इति वचनादोकारस्य पदादिः दादेशानुमानं वर्णमात्रनिर्देशो वाऽङ्कारस्तच्चारणार्थस्तदा श्रीभावप्रसंगः पदात्तु पूर्वस्त्वेण निर्देशस्तदा
प्रथमाद्वितीयाद्विवचनयोरेव श्रीभावेन भाव्यमिति दोषाभावः। एतमपि प्रश्लेषनिर्देशेन शक्यं परिहर्तुं· न च काचित्के इत्यत्र दोषः समानं प्रातिकमेवैकादेशमि

श्रीभावश्च प्रसज्येत। इह त्वश्रीभावश्च प्राप्नोति। असौ ब्राह्मणी आपत्तुत्तरस्य ओ᳟ऽः श्रीभवतीति श्रीभावः प्राप्नोति तस्मात्तोर्लो
पो वक्तव्यः। सो ओत्वप्रतिषेधः साकच्काद्वा तु त्वं च· सो ओत्वप्रतिषेधः साकच्काद्वा वक्तव्यः। साञ्च परस्य उत्वं वक्तव्यं· अ
सकौ· असुकः। उत्तरपदभूतानामादेशउपदेशिवद्वचनं· उत्तरपदभूतानांत्यदादीनामादेशउपदेशिवद्भावो वक्तव्यः। पर
माहं· परमायं· परमानेनाद्भिः प्रयोजनं· अनादिष्टार्थं प्रकृतेरेकादेशो आदेशाययथास्युरिति। किं पुनः कारणं एकादेशस्तावद्भवति·
न पुनरादेशाः। न परत्वादादेशैर्भवितव्यं बहिरंगलक्षणत्वात्· बहिरंगा आदेशाः अंतरंग एकादेशः। असिद्धं बहिरंगमंतरंगे। सत
र्थुपदेशिवद्भावो वक्तव्यो न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति। पूर्वोत्तरपदयोस्तावत्कार्यं भवति· नैकादेश इति· यदयं नेदमस्य प
रस्येति प्रतिषेधं शास्ति· कथं कृत्वा ज्ञापकं· इदं द्वावचो· तत्र ज्ञायस्येति लोपेनादिष्यते· अपर एकादेशेन· अनक इंदं संवन्नः तत्र
कृते· प्रसंगः पश्यति त्वाचार्यः पूर्वपदोत्तरपदयोस्तावत्कार्यं भवति। नैकादेश इति· ततो नेदमस्य परस्येति प्रतिषेधं शास्ति·
अदसः सोर्भवति त्वंद्भिः न तु लोपो विभाषितो। कृत्वाल्लुप्येत संबुद्धिर्नहलः प्रकृतं हि तत्र। आपएत्वं भवत्यस्मिन्न शलीत्यनुवर्तना

तंप्रतीक्षते ननु भिन्नकालप्राप्तिकं· साकच्कादिति· साकच्को यः सुर्विहितस्तस्मिन्विसर्जः प्रतिषेधसन्नियोगेन सासरस्याकारस्योत्वं भवति· बहिरंगा आदे
श इति· समासाद्या विभक्तिकृतलघुतेनत्वदपेक्षतावन्तो नांतरंगत्वादेकादेशं कृतेन स्यादिव भावादादेशे बुद्धिप्रमाणोऽसुपरमहं परमय मिसादिरतिप्रसंगः॥

शिवः ५६

मृजेः॥ ॥कंसपरिमृड्भ्यामिति। विमृक्किमाश्रित्य वृद्धिः प्राप्नोति क्ङिति चेति प्रतिषेधः क्ङिन्निमित्ता या एव वृद्धिरिति तत्र न प्रवर्त्तते। रज्जुसृड्भ्यामिति। भ्यां प्रत्ययो हलादिरकिद्भवतीत्यमागमप्रसंगः। प्रणड्भ्यामिति। नशेर्वेति कुत्वमप्यत्र न भवतीति केचिदाहुः। तदयुक्तं। पदत्वनिबंधनत्वादस्य प्रत्ययानपेक्षणात्। मस्जि-नशोर्झलीति नुमागमस्तु प्रत्ययापेक्षत्वाद्धातुप्रत्ययेन भवतीति। वार्त्रघ्न इति। हनस्तोचिण्णलोरिति तत्वं न भवति कुमति चेति णत्वं तु कुप्वाये हादेशेषु

मृजेर्वृद्धिः॥ ॥मृजेर्वृद्धिविधौ क्ङित्प्रतिषेधः। मृजेर्वृद्धिविधौ कंसपरिमृड्भ्यां तस्य प्रतिषेधो वक्तव्यः। कंसपरिमृड्भ्यां कंसपरिमृड्भिः। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धं। अथवा धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्सिद्धं। धातुप्रत्यये कार्यं भवतीत्येषा परिभाषा कर्त्तव्या। कान्येतस्याः परिभाषायाः प्रयोजनानि। सृजि-दृशि-मस्जि-नशि-हंति-गिरत्यर्थं। सृजि। रज्जुसृड्भ्यां रज्जुसृड्भिः। दृशि। देवदृग्भ्यां देवदृग्भिः। मस्जि। उदकमग्भ्यां उदकमग्भिः। नशि। प्रणड्भ्यां प्रणड्भिः। हंति। वार्त्रघ्नः भ्रौणघ्नः। गिरि। देवगिरौ देवगिरः। यदि स्वरूपग्रहणे इत्युच्यते प्रसृड्भ्यां प्रसृड्भिः अनुदात्तस्य चर्दुपधस्यान्यतरस्यामिति सम्प्राप्नोति। एवं तर्हीयं परिभाषा कर्त्तव्या धातोः कार्यमुच्यमानं तत्प्रत्यये भवतीति। सा तर्ह्येषा परिभाषा कर्त्तव्या न कर्त्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति यदयं क्षोणग्रहणेन तं शास्ति॥ ॥अचो ञ्णिति॥ ॥अज्ग्रहणं किमर्थं। इग्ग्रहणं वर्ज्यग्रहणं गोर्थं वृद्धावज्ग्रहणं क्रियते गोतो णिदिति यथा स्यात् गौरिति। नैतदस्ति प्रयोजनं। णित्करणसामर्थ्याद्वा वृद्धिर्भविष्यति। अस्त्यन्यणित्करणे प्रयोजनं। किं। गावौ गावः इति। चातउपधाया प्रतिषेध इति न भवति। देवगिरौ विति। अचि विभाषेति लत्वं न भवति। अभ्याभ्रौतीति। तद्विधौ धातोः स्वरूपेणानुपादानात्॥ ॥अचो॥ ॥अज्ग्रहणमिति। अंतरेणाज्ग्रहणमिकाद्येषा परिभाषा पस्थानादिगंतस्य वृद्धिः सिध्यति अकारस्य तु चिकीर्षकः इत्यादावतो लोपेन भाव्यं आकारस्य तु विशेषो नास्ति संध्यक्षराणामात्वेन भाव्यमिति प्रश्नः। गोर्थमिति। अस्त्यज्ग्रहणे इकारि

[illegible]

[illegible]

मा॰कै॰
५७

अथयोगविभागइति॰यद्यपिणौविलुक्तेनोदाहरणेनयोगविभागस्यप्रयोजनंप्राप्यतेतथाप्यनेकप्रयोजनोपन्यासायप्रश्नप्रतिवचने॰सखायाविति॰सखिशब्दो
इतिस्थितेनवृद्धेरसंगः। णित्वंतुसखायइत्यत्रजसिगुणेऽयादेशेकृतेऽतउपधायाइतिवृद्ध्यर्थंस्यात्॰सखायाइत्येतत्तुप्रसंगेनोदाहृतंणित्वावकाशप्र
दर्शनार्थंवा॰व्यंजनाद्यर्थइति॰व्यंजनादिर्यःप्रत्ययस्तत्रवृद्ध्यर्थः।जैत्रमिति॰जियुभ्यामौणादिकःष्ट्रन्॰चौलमिति॰जनिदाच्युभ्यःइतित्रन्॰तलमिति॰

अथयोगविभागःकिमर्थः।नञ्णित्यतउपधायाइत्येवोच्येत॰कारूपसिद्धिः।चायकोलावकःकारकोहारकः।गुणेकृतेऽयवोरपर
तेचअतउपधायाइत्येवसिद्धं॰योगविभागःसखिव्यंजनाद्यर्थः।योगविभागःक्रियतेसख्यर्थोव्यंजनाद्यर्थश्च॰सख्यर्थस्तावत्॰सखा
यौसखायः।व्यंजनाद्यर्थः।जैत्रंयौत्रंचौलं॰योगविभागेचेदानींसखिव्यंजनाद्यर्थेक्रियमाणेऽज्ग्रहणमपिकर्त्तव्यंभवति॰किंप्र
योजनंगोरर्थं॰ननुचोक्तंणित्करणसामर्थ्याद्गवांवृद्धिर्भविष्यति॰अस्त्यन्यत्णित्करणेप्रयोजनं॰किं॰गावोगावः।अतउपधायाइ
तिवृद्धिर्यथास्यात्॰यत्तुसौणित्करणंतदनवकाशंतस्यानवकाशत्वादेववृद्धिर्भविष्यति॰यथैवखल्वपिणित्करणसामर्थ्या
दनिकोवृद्धिःप्राप्यतएवंतलमपिप्राप्नोति॰तलमपिहिञ्णितीत्युच्यतेतस्मादज्ग्रहणंकर्त्तव्यं॥ ॥तद्धितेष्वचामादेः॥ ॥अज्
ग्रहणंकर्त्तव्यं॰ननुचक्रियते॰द्वितीयंकर्त्तव्यंयथाचामादिग्रहणमज्विशेषणंविज्ञायेत॰अचामादेरचइति॰अथाक्रियमाणे
अज्ग्रहणेकस्याचामादिग्रहणंविशेषणंस्यात्॥

नस्लोः।चिन्नलोरितिनिर्दिश्यमानंगोरपिस्यात्तस्मैषदोषःप्रापदितिज्ग्रहणंक्रियते॥
तद्धितेषु॥ ॥अज्ग्रहणंकर्त्तव्यमिति॰अचामित्यनेननिर्धारणषष्ठ्यंतेनसामानाधिकरण्येनादेर्विशेषयितुमशक्यत्वादिकसरिनाभोपस्थानादिकए
वाचोवृद्धिप्रसंगः।अथाक्रियमाणइति॰निर्धारणंतुल्यजातीयस्यसंभवतियथाकृष्णागवांसंपन्नक्षीरतमेत्युक्तेगोरेवप्रतीयतेतथाचामादिरजे

कर्त्तव्यकृतमिति॥

शिवः
५७

=ननुनियमार्थं तं विधिनियमसंभवइतिन्यायादिसर्वः ॥ ३ ॥ =इकारस्येनगतो विशेषणसंभवात् ॥ १ ॥

नियमार्थं वा ग्रहणं २

इग्विशेषणमिति· तुल्यजातीयनिर्धारणेपीकारस्योपस्थानं न निवार्यते· अज्ग्रहणे तु क्रियमाणे निर्दिष्टस्थानिकलादिकाविशेषानुपस्थानं यथा चो ञ्णितीस त्रे अज्मात्रस्येति· नन्वङ्ग्रहणसामर्थ्यादज्मात्रस्यनभविष्यति· नतत्सामर्थ्यात्तर्हिनिवृत्तिरेवाज्ग्रहणस्यस्यादकारस्यैव वृद्धस्वस्यनान्यस्येति दीर्घस्यतीक इकार सात्राद्युपधायाःस्यादेव· अकारे णेति· विशेषणस्याजंतरनिवृत्तिःप्रयोजं· अथ वैकयोगइति· एकोभवतिरध्याह्रियते· तेन तुल्यकालताविधानस्यस्वका

इग्विशेषणं· तत्र कोदोषः। इहैवस्यात्· ऐतिकायनः औपगवः इह नस्यात्· गार्ग्यो वात्स्यइति· तत्तर्हिज्ग्रहणं कर्त्तव्यं न कर्त्तव्यं· प्रकृतमनु वर्त्तते क्व प्रकृतं· अचोञ्णितीति· यदितदनुवर्त्तते· तउपधायाअचश्चेति अज्मात्रस्योपधायावृद्धिः प्रसज्येत भेद्यच्छेदइति· अकारे णतपरेणचं विशेषयिष्यामः अचः अत इति· इहेदानीमचइत्यनुवर्त्तते· तइतिनिवृत्तं· अथवा मंडूकगतयोधिकाराः· तद्यथामं डूकाउत्प्लुत्योत्प्लुत्यगच्छंतितद्वदधिकाराः। अथ वैकयोगःकरिष्यते अचोञ्णिति तउपधायास्ततस्तोह्नितेषचामादेरिति· न चै कयोगेनुवृत्तिर्भवति· तद्धितेषचामादिवृद्ध्यवंसोपधालक्षणप्रतिषेधः। तद्धितेषचामादिवृद्ध्यावंसोपधालक्षणयावृद्धेः प्र तिषेधोवक्तव्यः। कौष्टुः जागतइति· ननुचाचामादिवृद्धिरंलोपधालक्षणांवृद्धिंबाधिष्यते कथमन्यस्योच्यमानान्यस्यबाधिका स्यादस्तिखल्वपिसंभवे बाधनं भवतिअस्तिखल्वपिसंभवोयदुभयंस्यात्· लोकविज्ञानात्सिद्धं· लोके सत्यपिसंभवेबाधनंभ ति· तद्यथा· दधिब्राह्मणेभ्योदीयतांतक्रंकौंडिन्यायेति

यैयापाशस्यत्रोपस्थानाभावः। कौष्टुइति· कोष्टुशद्वात्तस्येदमित्यण्· जागतइति· जग च्छद्वादण्· ननुचाचामादिरिसंगंकार्यमिन्यतेतत्र तक्रकौंडिन्यन्यायावतारः। इतरस्तुस्थानिभेदंमत्वाह· कथमन्यस्येति· आमलकीजइत्यादावन्य स्यापिस्वरोविधीयमानोन्यस्वरंबाधत एवेत्याशंकाह· अस्तिखल्वपीति· लोकविज्ञानादिति· अंगंकार्यितदेवावयवद्वारेणसंक्रियतेततश्चैकस्यका

इ॰ ३ नञ्गा ३

भा॰कै॰ नाप्राप्त इति॰ सामान्यविशेषभावो बाधहेतुः स चेह नास्ति॰ पुष्करसद्ग्रहणादेति॰ वाशब्दस्तर्हि अर्थे पूर्वस्य हेतोरनवस्थितत्वात्॰ ननु च ठगर्थः पुष्करसद्ग्रहणं ठः स्यात्
५८ पुष्करसदा चरति पौष्करसादिक इति॰ ञ्णिसत उपधाया इति वृद्धेर्विधाना हुक्प्रसंगात्॰ एवं तर्हि ठगतो नभिधानान्न भवति॰ यथा प्रतिपदविहितः स्त्रेव पुष्क
रसद उत्तरपदस्य वृद्धिर्नभवतीनान्यत्र॰ केचिदाहुः॥ लोकविज्ञानात्सिद्धमिति वार्त्तिककारस्याविप्रतिषेधो विवक्षितो यथा भल्लवोनुन्विधावुगिल्लतिषेधात्सि
द्धमिति॰ अंसोपधालक्षणया वृद्धेरवकाशः॰ गोः पावक इति अस्यावकाशः सौस्नुत इति॰ क्रोड्ञागतइत्स चोभयप्रसंगे परत्वादादिवृद्धिर्भवति॰ सकृद्गतप

सत्यपि संभवे दधिदानस्य तक्रदानं निवर्त्तकं भवति॰ एवमिहापि सत्यपि संभवेऽचामादिवृद्धिरंत्योपधालक्षणं वृद्धिं बाधि
ष्यते॰ विषमउपन्यासः॥ नाप्राप्ते दधिदाने तक्रदानमारभ्यते तस्मात्तदारभ्यमाणं बाधकं भविष्यति॰ इह तु न रप्राप्तायामंत्योप
धालक्षणायां वृद्धावचामादिवृद्धिरारभ्यते सुस्नुत सौस्नुत इति॰ पुष्करसद्ग्रहणाद्वा॰ अस्य मनुशतिकादिषु पुष्करस भवाभव
च्छद्रं पठति तज्ज्ञापयत्याचार्यो चामादिवृद्ध्या वंसोपधालक्षणा वृद्धिर्न भवतीति॰॥ ॥इति श्रीभगवत्पतंजलिविरचिते
व्याकरणमहाभाष्ये सप्तमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकं॰ पादश्च द्वितीयः समाप्तः॥ ॥७॥ ॥७॥ ॥

रिनाषाश्रीयते न तु पुनः प्रसंगविज्ञानं॰ एवं च पुष्करसद्ग्रहणं हेतिविकल्पार्थ एव वाशब्दः बाधकत्व सामान्याभिप्राये एव च शास्त्रविज्ञानमेव लोकवि शि॰कः
ज्ञानमुक्तं॰ अथ यत्रादिवृद्धिः प्रतिषिध्यते तत्रांत्योपधलक्षणा कस्मान्न भवति यत्सोऽभावो वैयसवमिति इग्॰ तां चेत्स एव्यापदिभवं वैयापद ५८
मिति॰ अत्राप्यैचौ परत्वाद्बाधकाविति सर्वैष्टसिद्धिः॥ ॥इत्युपाध्यायजैयटपुत्र कैयटकृते भाष्यप्रदीपे सप्तमाध्याय द्वितीयपादे द्वितीयमा
ह्निकं॰ पादश्च द्वितीयः समाप्तः॥ ॥७॥ ॥श्रीः॥

देविकाशिंशपा०॥ ॥देविकादिष्विति। विशेषणविशेष्यभावे कामचाराद्यदंगेन देविकादीनि विशेष्यंते तदा तेषामंगसंज्ञा न भवतीति तदंतविध्यभावाद्दंगानि
देविकादीन्याश्रीयंते। यदा तु देविकादिभिरंगं विशेष्यते तदा तदंतविधिना देविकाद्यंतमंगं गृह्यते तेन तु कथंचित्तदादिविधिः संभव इति तदादिग्रहणं क-
र्तव्यं। तत्र केवलानां देविकादीनां तदादीनां चाकारो भवतीति वक्तव्यं अन्यथा केवलानां न स्यात् दाविकमुदकं शांशपश्चमस इति। न च व्यपदेशिवद्भावो-
स्ति। अप्रातिपदिकेनेति प्रतिषेधात्। यदि तु प्रत्ययविधिविषय एवायं निषेधः तदा केवलानां व्यपदेशिवद्भावात्सिध्यति। आद्यज्विशेषणमिति। अंगस्य देवि-

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात्॥ ॥देविकादिषु तदादिग्रहणं कर्तव्यं। इहापि यथा स्यात् दाविकाकूलाः शालयः शांश-
पास्थला देवाः। किंपुनः कारणं न सिध्यति। अन्यत्र तद्ग्रहणात्तदंतग्रहणं वा। अन्यत्र हि तस्य वा ग्रहणं तदंतस्य वा भवति। न चे-
दं तन्नापि तदंतं। आद्यज्विशेषणत्वात्सिद्धं। आद्यज्विशेषणं देविकादयः। नैवं विज्ञायते देविकादीनामंगानामचामादेरचाकारो भ-
वतीति कथं तर्हि ञ्णिति अंगस्याचामादेरचः आकारादेशो भवति स चेद्देविकादीनामाद्यच् भवतीति। अंतरतमनिवर्तकत्वाद्वा। अथवा नांते
गानंतरतमाद्वृद्धिर्निवर्त्स्यते किं तर्ह्यंतरतमानेन निवर्त्यते। सिद्धात्र वृद्धिस्थले तेषु चामादेरित्येवं तत्रांतरतमानेन वृद्धिर्निवर्त्स्यते। परि-
हारांतरमेवेदं मत्वा पृच्छति। कथं चेदं परिहारांतरं स्यादित्याद्यज्विशेषणं देविकादयः अवश्यं चैतदेवं विज्ञेयं आद्यज्विशेषणं देविकादय
इति। यदि नाद्यज्विशेषणं देविकादयः स्युरिहापि प्राप्नोति। सुदेविकायां भवः सौदेविक इति। अथात्राप्याद्यज्विशेषणत्वादित्येव सिद्धं परि-

कादिभिः संबंधाभावः। अंतरतमनिवर्तकत्वाद्वेति। ञ्णिति किति चेति वर्तते तत्र स्थानेंतरतम इति वचनादैकारो वृद्धिसंज्ञः प्राप्त आदिति वचनेन निवर्त्स्यते न
तपूर्व आकारो विधीयते अनेन हि स्थानेंतरतम इति नियमं बाधित्वा नियमांतरं क्रियते देविकादीनामाकारो वृद्धिर्नान्या। परिहारांतरमिति। पूर्वत्राप्येयं दे-
विकादीनां वृद्धिर्विधीयमाना आकारो भवतीति केवलानां तदादीनां च वृद्धौ देविकादीनां भवतीति तत्रैव परिभाषाप्रवृत्तिः सुदेविकायां तु प्राप्त वृद्धिर्न स्याद्देविकादि

59

तियाति:
=न तु प्रत्ययैवपक्षे तदंगस्य विशेषणत्वे दाविकाकूले [illegible]त्यादिः विशेष्यत्वे सौदेविके आद्यजि [illegible] मिति। परिभाषाप्रकरणे द्रष्टव्यं न चांगसन्निधानान्न दोष इति भावः। तदा देविकादीनामिति।

-मर्थास्त्विति· एवं च निरुत्तरत्वात्कार्यकालाभावात्परिहारांतरलोक्तिरसंगतेत्याशयः॥ विधिमाह वर्णादिविधिरेव युक्तः॥ २=

भा·कै·
५९

यथोद्देशं च परिभाषा श्रीयते न कार्यकाला· अन्यथांगप्रकरणे देविकादीनामादिस्सोपस्थानादयास्मतियास्योः पूर्ववदन्यतरप्रसंगात्प्रकृतप्रदेशेऽन्यत्रोक्रियमाणे विधेरेवा
कारस्य भवति अर्थात्त्वैकारस्य निरुत्तिरितिनायं परिहारउपपद्यते नरतमनिवर्त्तकत्वादेति· सत्यं तर्हीति· अष्टाध्यायीलक्षणं सत्यं सान्निवेशांतराश्रयणेन भिद्यते·
अथवास्मेवसत्त्वम स्यस्यान भेदाद्देशो भवति· आधज्विशेषणत्वादिति· द्वितीयः परिहारो दूषितः पूर्वस्तु स्थित एव· अत्रैवार्थे लिंगदर्शनं· न्यग्रोधे चेति· केवलग्रहणं
मिहप्रकरणे गृह्यमाणमाधज्विशेषणमिति ज्ञापयस्यन्यथा तदनर्थकं स्यात्· न च तदंत विधिनिरासार्थमंगेन न्यग्रोधस्य विशेषणात्तदंत विधेरप्रसंगात्· तदेत

न्नस्मोयत्र क्रियमाणे दोषस्तत्र कर्त्तव्यमिति किं तर्हि यत्राक्रियमाणेन दोषस्तत्र कर्त्तव्यं· कच क्रियमाणेन दोषः॥ संज्ञाविधौ· वृद्धिरादैचू देविका
दीनामाकार इति· सिध्यति· सत्यं तर्हि भिद्यते· यथान्यासमेवास्तु· ननु चोक्तं देविकादिषु तदादिग्रहणं कर्त्तव्यमन्यच तद्ग्रहणंतदादिग्रहणं
चेति· परिहृतमेतत्· आधज्विशेषणत्वात्सिद्धमिति· न्यग्रोधे च केवलग्रहणं तत्· न्यग्रोधे च केवलग्रहणमन्यामहेआधज्विशेषणे दे
विकादय इति· तस्य केवलग्रहणस्यैतत्प्रयोजनं इह माभूत्· न्याग्रोधमूलाः शालय इति· यदि चाधज्विशेषणं देविकादयस्ततः केवलग्रहण
मर्थवद्भवति· तदेतत्कार्यं सत्वाज्ज्ञापकं भवति यदि न्यग्रोधशब्दोऽव्युत्पन्नं शाति पदिकं भवति· अथ हि न्यग्रोहतीति न्यग्रोधस्ततो नियमार्थं प
दांत इतिकत्वान ज्ञापकं भवति· वहीनरस्येद्वचनं· वहीनरस्येत्वं वक्तव्यं· वहीनरस्यापत्यं वैहीनरिः॥ कुरुनरवाडवस्त्वाहनैषवहीनरः कत्त
दिति· व्युत्पत्तिपक्षे न्यग्रोधस्य च केवलस्येतिवृद्धिनिषेधस्यैव च अविधायकमिति केवलग्रहणं ज्ञापकार्थं भवति हि विहीनर एषः विहीनो नरः कामभोगाभ्यां विहीन
ति· व्युत्पत्तिपक्षेतु न य्वाभ्यामिति सिद्धे केवलस्यैव न्यग्रोधस्य यथा स्यात् न्याग्रोधमूलाः शालय इत्यादौ माभूदिति नियमार्थं केवलग्रहणं न ज्ञापकं भवति· न हि न्यग्रोध
स्यैतावताभिमतनियमसिद्धिः· तदंगस्यैव न्यग्रोधस्य नांगादेरित्येवमिष्टो नियमः सिध्यत्येव· नैतदस्ति· अनिष्टोपि नियमः स्यान्न्यग्रोधस्यैवानिमित्तात्
रस्य वृद्धिप्रतिषेध इति नैयायिको नैयासिक इत्यादौ न स्यात्तस्मात्केवलग्रहणमभिमतनियमसाधनाय भवादेरित्ययं तु निषेधउक्तार्थज्ञापको भवति· वहीनर
स्येति· वहोस्यास्तीति वही स चासौ नरश्चेति कर्मधारयसमासो ऽन्येषामपि दृश्यत इति दीर्घः॥ तस्यापत्यमत इञ्· इकेरपवाद

शिवः
५९

=विनापि केवलग्रहणमिदं नियमार्थं कृतं न स्यादिति· २= भवादेरिति· नायं दिगुपदेशस्यापवादः किंतु देविकादिसूत्रप्राप्तस्य निषेधोयं· भवानमित्रेषु वैदिकेषु दृष्टं· २=

प्रतिषेध ॰ ध्यवा॰

नय्वाभ्यां॰॥ ॥य्वाभ्यांपदांताभ्यांपूर्वौवैजित्येवसूत्रंकार्यंनार्थोरद्धिप्रतिषेधेन॰अपवादाविति॰एकस्मिन्नंगविशेषेविधीयमानावैचौसामान्यविहितायारद्धेर्बाध कौसत्यपिसंभवेसामान्यविशेषविषयत्वेनबाध्यबाधकभावदर्शनात्॰इदानींविषयभेदादसत्यप्येज्रद्ध्योर्बाधकत्वेप्रतिविधानुमाह॰यद्यपीति॰अभ्यु पगम्यवादेनोच्यते॰नहिरद्धौसत्यांसर्वेष्टसिद्धिःवैयाकरणभार्यइत्यत्रवृद्धिनिमित्तस्येगिधुंवद्भावप्रसंगात्॰तस्मात्सूत्रंतरप्रासारद्धिमात्र त्यांबाधितानित्यावैचौनविष्यतःबाधितत्वाचपुनर्वृद्धिर्नभविष्यतीत्यभ्युपेयं॰ऐचोर्विषयार्थमि॰याभ्यांयवाभ्यांपरस्यरद्धिःप्राप्तानिषिध्यतेता

=नेति॰न्यायवत्तनन्यायादितिभावः॥४=

नय्वाभ्यांपदांताभ्यां॰॥ ॥य्वाभ्यांपरस्यारद्धित्वं॰प्रसिद्धं॰कुतः॥अपवादोवदृहितौ॰अपवादोहिरद्धेस्तावैचावुच्येते॰नित्यावैचौतयोर्वृ द्धिः॥अथवानित्यावैचौकृतायामपिरद्धौप्राप्नुतःअकृतायामपि॰नित्यत्वादैचोः॥कृतयोरप्यपिरद्धिस्तयोरेव॰किमर्थंनेतिशिष्य ते॰अथकिमर्थंप्रतिषेधउच्यते॰ऐचोर्विषयार्थंप्रतिषेधसन्नियुक्तवचनं॰ऐचोर्विषयार्थंप्रतिषेधसन्नियोगेनैचावुच्येते॰यत्रय्वाभ्यां परारद्धिस्तत्राध्यध्येयर्थानतौ॰यत्रय्वाभ्यांपरस्यारद्धिरुच्यतेतत्रैचौयथास्यातांइत्येवमर्थमिति॰आध्यध्विदीध्यध्विभिर्वाध्य ध्विरिति॰नैतदस्तिप्रयोजनं॰अचामादेर्वाभ्यांतौ॰अचामादिनात्र्यौविशेषयिष्यामः॥अचामादेर्यौय्वाविति॰कथंयाशीतिकेनतौ

याशीतिकइत्यत्रकस्मान्नतौभवतः॥ ॥७॥

भ्यांपूर्वौवैचौयथास्यातामन्याभ्यांमाभूतामित्येवमर्थंप्रतिषेधवचनं॰आध्यध्येयर्थानताविति॰स्यातामिति वाक्यशेषः॥अध्यारूढोध्वमितिप्रादिसमासः॥अतइत्यत्र॰असत्यपिनिषेधंधानेदोषंपरिहर्तुमाह॰अचामादेरिति॰अचामादेरचःस्थानेयौय्वौताभ्यांपूर्वौ नवत्वइत्याश्रीयमाणेआध्यध्विनित्यादावैचोऽप्रसंगः॥याशीतिकइति॰द्वेअशीतीमूनतइतिमद्धिसमासः॥ततष्ठन्॰अर्थ्येपूर्वद्धिगोरित्सचार्दिलधिको रुद्धुभवति॰अचाचामादेरचोपकारस्यविधानात्ततःपूर्वएकारःप्राप्नोति॰ताविति द्विवचनंयाशीतिकस्योपलक्षणंतानुपात्तं॰यद्यपियोरकामादिनावि

तार्थे॰

=स्वांगकइत्यादौस्वंगतगरद्वादरूपानदनीतिनुनितुमुसर्वार्थेसुनरपदद्धौरोपात्॰७=

एतत्परिहर्तुमाह·यत्रेति·अचामादेरित्यत्र वृद्धिः प्राप्नोति तदपवादाद्वैचौ विधीयेते·अत्र तु संख्यायाः संवत्सर संख्यस्येति वृद्धिर्विधीयते·अचामादेरिति वर्त्तते तेन चेह अचामादेरित्येतदाश्रीयेते·नत्वेकं रूपपदं·तेनाचामादेरित्येवं प्राप्ता वृद्धिस्तस्यां प्राप्तायां तदपवादाच्चामादेः स्थाने प्याभ्यां पूर्वौ वैचौ भवत इत्यर्थः संपद्यते·उत्तरपदाधिकारे पीति·तथा च प्रग्राश्रीति के दोषः पूर्वत्रैव लिंग इति·प्राचां ग्रामनगराणामित्युत्तरपदस्य वृद्धिः प्राप्ता प्रतिषिध्यते·नैष दोषः

यत्र वृद्धिरचामादिस्तत्रैवाचत्र प्योर्हिसा·यत्राचामादेरित्येवं वृद्धिस्तत्रैवाभ्युच्यते·अत्र प्योरित्येवं वृद्धिः। किमिदं प्योरिति·उत्तरपद

स्येति·उत्तरपदाधिकारे प्यवश्यमेवागमोनुवर्त्तते पूर्वत्र लिंग इत्यत्र वः पूर्वत्रैव लिंग इत्येव मर्थं·नैष दोषः। उत्तरपदेनात्राचामादिं विशेषयिष्यामः अचामादिनायो उत्तरपदस्याचामादेर्यौ प्यावितिः अथ कस्मात् पदान्ताभ्यां·अथ किमर्थं पदान्ताभ्यामित्युच्यते·यमेणोनन्ये वध्येनः। इणो यणोदेशो माभूत्‌·यत्र छात्राः याता इति·इह वैयाकरणः सौवश्व इति प्राकलं प्राप्नोति·प्योस्वस्यानिवन्नावादयो वैप्राप्नुतः। शाकल्यावादेशेषु चोक्तं·किमुक्तं·शाकलेनावधुक्तं सिद्धित्यसमाससयोः शाकल प्रतिषेध इति·अथवा वोः किमुक्तं·अचः पूर्वत्वविज्ञानादेचोः सिद्धमिति·प्याभ्यां परस्या वृद्धिस्तमपवाधोरवुद्धितौ·निसा वैचौ तयोर्हि वृद्धिः किमर्थं नेतिशिष्यते यत्र प्याभ्यां परा वृद्धिस्तत्राध्यस्थेर्यथानतौ·अचामादेर्यवाभ्यां नौ कथं प्राश्रीति केन तौ·यत्र वृद्धिरचामादेस्तत्रैवाचत्र प्योर्हिसा

ति·प्राश्रीति कइत्यत्र तदेवं नेतिप्रत्यास्यातं·याता इति· ((अथ कस्मात् पदान्ताभ्यां पथे णोनन्मे वध्यनः।। ।।वारा।। ।।अथ परस्या वृद्धिरित्य अचामादेरचः स्थाने भवतु स यं यकार इत्यैच्प्राप्नोति·ननु चान्तरंगत्वात्पूर्वमेव यणा भाव्य मिति वैयाकरणः स्वश्च इति पूर्वमेव यण भवतिततो यथाचामादेर्यणो भवत्यथा यणादेशो भवती सदोषः। अचः पूर्वत्वविज्ञानादिति·योनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवद्भावइत्यर्थः।। ।।वारा।। ।।पूर्वत्र त्रे वृद्धिर्विशे

ध्यतत्पूर्वगता

षः प्रतिपत्तिलापपवायकृतौ न घेकेनाचामादेरित्यनेनोत्तरपदाकां विशेषणित्यु[redacted]नाप्यप्रतिषिध्यमाना

यदीति॰ यद्येवं वृद्धिप्रतिषेधस्तर्ह्येवैज्भ्यां भाव्यं नान्यत्र॰ शौवमिति॰ श्वनो विकार इति प्राणिरजतादिभ्योऽञिति अञ्॰ श्वशब्दस्य तु पाठस्तदा पर्थः स्यात् तत्र शौवहान

मिति॰ यावंतोयण इति॰ अपदाविर्थस्यादस्य सर्वेभ्यो यण्भ्यः पूर्वौ वै चौ प्राप्नुतः प्रतिषेधे तु विज्ञायमाने याभ्यां पवाभ्यां पदस्य वृद्धिप्रतिषेधस्ताभ्यां पूर्वौ वै

चावितिनास्ति सर्वप्रसंगः प्रकृत्यैकाजितीष्टमेव यं स्वप्रकृतिभावस्तथा चद्रेत्ये दैवतास्य इत्यत्र न भवति॰ इत्यत्र विशेषेण प्रकृतिभावमाश्रि

सेन तदुक्तं परिहारदिक्प्रदर्शनार्थं अत्र हि परत्वाट्टिलोपं बाधित्वा वृद्धिः प्राप्ता प्रतिषिध्यत इति न वृत्त्यैजागम इत्यय मत्र परिहारः॰ शुनुवाध्य

यद्यनुवर्त्तते शौवं मांसं टिलोपे कृते ऐजागमो न प्राप्नोति॰ अपरिनिर्वर्त्तनं स्वाध्याय शब्देकारादिषु पठ्यते तत्र यावंतो यणः सर्वेभ्यः पूर्व

ऐजागमः प्राप्नोति॰ यद्येवमसितथास्तु॰ अस्तु नाम वर्त्तते॰ कथं शौवं मांसं॰ आनुपूर्व्यासिद्धमेतत्॰ नाचाकृत ऐजागमे टिलोपः

प्राप्नोति॰ किं कारणं प्रकृत्यैकाजितिहि प्रकृतिभावेन भवितव्यं॰ तदेतदानुपूर्व्यासिद्धं भवति॰ अथवा पुनरस्तु निर्वर्त्तनं॰ ननु चो

क्तं स्वाध्याय शब्दे कारादिषु पठ्यते तत्र यावंतो यणः सर्वेभ्यः पूर्व ऐजागमः प्राप्नोति॰ कः पुनरर्हति स्वाध्याय शब्दं कारादिषु पठि

तुं॰ एवं किल पठ्येत स्वमध्ययनं स्वाध्याय इति तत्र न शुनुवा अध्ययनं शोभनं वाध्ययनं स्वाध्याय इति॰ अथापि स्वमध्ययनं स्वाध्या

य एवमपि न दोषः अचामादेरिति वर्त्तते॥ ॥श्वादेः॥ ॥अयं श्वन्शब्दो द्वारादिषु पठ्यते न तत्र कः प्रसंगो यन्न दादेः स्यात्॰ नैव प्राप्नो

तिनार्थस्तदादिप्रतिषेधेन॰ इह तस्य वाग्यहणं भवति न दं तस्य वानचेदं तन्नापि

धायनमिति॰ अन्येषामपि दृश्यत इति दीर्घः आङ्वामध्ये प्रश्लेषः

यः॥ अचामादेरिति वर्त्तत इति॰ तत्रैवमभिसंबंधोऽचामादेरनंतरयोर्य्वोर्नाभ्यां पूर्वौ वै चौ भवत इति तेन स्वाध्यायशब्दे यकारात्पूर्व ऐज्भवति न तु पकाराभ्यामिति

र्थः॥ यद्यपि स्वोऽध्यायः स्वाध्याय इत्यस्यामपि व्युत्पत्तौ स्वाध्यायशब्दो न पठितव्यः स्वशब्दस्य द्वारादिषु पाठात्तदादिविधेश्चेष्टत्वात्तथापि पाठे विशेषो नास्तीति प्रदर्शनाय भाष्यकारेण

पाठमनुगम्य

इतरस्त्वगृहीताभिप्राय आह· न वैतत्तदादिविधिरस्तीति· अन्यहणे इति· अवयवग्रहणस्योपलक्षणार्थत्वात् एतत्प्रकरणे निर्दिष्टे ईकादिनिर्देशादिभिश्चा
देशो विशेषणेन तदादिविधिर्भवतीति ज्ञाप्यते· शौवहानमिति· जिहते अस्मिन्निति ल्युट् शुनां हानमिति षष्ठीसमासः। अहानमस्मिन्नस्तीति तदस्मिन्नस्ती
ति देशे तन्नाम्नी सण्· वृद्धिप्रतिषेधः ऐजागमश्च द्वारादित्वात्· शौवादंष्ट्र इति· शुनो दंष्ट्रा श्वादंष्ट्रा शुनो दंत इति दीर्घः तत्र भव इत्यण् संज्ञापूर्वको विधि

न वैतत्तदादिविधिरस्तीति· अत उत्तरं पठति· प्रतिषेधे श्वादिग्रहणं ज्ञापकमन्यत्र अवयवग्रहणे तदादिग्रहणस्य शौवहानाद्यर्थं· प्रतिषेधे
श्वादिग्रहणं क्रियते ज्ञापकार्थं· किं ज्ञाप्यं· एतज्ज्ञापयत्याचार्यः अन्यत्र अवयवग्रहणे तदादिग्रहणं भवतीति· किमेतस्य ज्ञापने प्र
योजनं· शौवहानाद्यर्थं· शौवहानं नगरं· शौवादंष्ट्रो मणिरिति· इकारादिग्रहणं च श्वागणिकाद्यर्थं· इकारादिग्रहणं च कर्तव्यं· किं प्र
योजनं· श्वागणिकाद्यर्थं· श्वगणेन चरतीति श्वागणिकः। तदंतस्य चान्यत्र प्रतिषेधो वक्तव्यः। श्वाभस्त्रेः स्वं श्वाभस्त्रं।। ।।उत्त
रपदस्य।। ।।किमर्थमिदमुच्यते अवयवादृतोरिति वक्ष्यति तदुत्तरपदस्य यथा स्यात् अचामादेर्मा भूत्· नैतदस्ति प्रयो
जनं अवयवादिति पंचमी तत्रांतरेणाप्युत्तरपदं उत्तरपदस्यैव भविष्यति· उत्तरार्थं तर्हि सुसर्वार्धाज्जनपदस्येति सुसर्वार्धा
दिति पंचमी दिशोमद्राणां दिश इति पंचमी प्राचां ग्रामनगराणां दिश इत्येव· संख्यायाः संवत्सरसंख्यस्य च संख्याया इति पंच
मी वर्षस्याभविष्यति संख्याया इत्येव परिमाणांतस्यासंज्ञाशाणयोरिति संख्याया

रनिसइति दृष्टाच्छो न भवति· इकारादिग्रहणं [illegible] मिति· श्वादेरि

=भसमासेनिष्कादिभ्य इति सूत्रस्य पदमनैकिकरतिभाष्येदाहरणविरोधेप्येकदेशिमतमेतदि

तीति सूत्रं कर्तव्यं· तत्र यस्मिन्विधिस्तदादावल्ग्रहणे इति तदादिविधिर्भवति· श्वागणिक इति· श्वगणादृश्चेति ठञ्· तदंतस्येति· इञं तस्य· श्वाभस्त्रमिति· इ
त्रश्चेत्यण्· वासतद्धितनिमित्तो वृद्धिप्रतिषेध ऐजागमश्च बहिरंगतात्स्वरूपग्रहणाश्रयेण निषेधेन निवारयितुमिति वचनारंभः।। ।।उत्तर।। ।।किमर्थमिति· तस्मादित्यु

= स्वयंफलांतरमाह · उत्तरेति · इदमवयवाद्यो दिसादिसकल वृद्धिप्राधान्यं · = चिंत्यमेतदिति · चिंताबीजं तु पूर्वपदस्य चेत्यत्र पूर्वपदग्रहणाद्यत्रोत्तरपदस्य वृद्धिस्तत्र पूर्वपदस्याचामादेर्नोत्वृद्धिर्नेति ज्ञापनाद्द्विषाष्टिके ग्रामादिवृद्धिर्न · व्याशीतिके तदंतरंगलाघवाच्च स्यात्

जेप्रोष्ठपदानामिति · पंचमीनिर्देशाभावादुत्तरपदस्य न स्यात् · वचनं तु नाद्यजर्थं विज्ञायमानं पूर्वपदस्यापि वृद्धिं विदध्यात् नियमार्थं वा स्याज्ज्ञातार्थ एव
प्रोष्ठपदानां वृद्धिः प्रोष्ठपदानामेव बाजातार्थ इति · प्रोष्ठपाद इति · प्रोष्ठपदाभिर्युक्तः काल इत्यण्लुबविशेषे इति लुपि कृते संधिवेलादिसूत्रेणाजा
तार्थे ण् · अत्रांगस्याचामादेर्वृद्धिर्माभूदित्येवमर्थं उत्तपदाधिकारः उत्तरपदवृद्धौ सर्वं चेत्यत्रोत्तरपदाधिकारविहितवृद्धिपरिग्रहार्थश्च · द्विषाष्टि
क इति · नन्वत्राप्यचामादेर्वृद्धिः प्राप्नोति कथमयमवकाशः अथात्र येन नाप्राप्तन्यायेनादिवृद्धिर्बाध्यते तद्व्याशीतिके विप्रतिषेधानुपपत्तिः उत्सर्गाप

× चामादिवृद्धेरुत्तरपदवृद्धि ×
× र्भवति विप्रतिषेधेन · किंप्र ×
× योजनं · व्याशीतिकाद्यर्थं · अ ×

इदं तर्हि प्रयोजनं · जेप्रोष्ठपदानां उत्तरपदस्य यथा स्यात् पूर्वपदस्य मा भूत् · प्रोष्ठपदासु जातः प्रोष्ठपादो बालकः · तद्धितेष्वचामा
दिवृद्धेरुत्तरपदवृद्धिर्विप्रतिषेधेन व्याशीतिकाद्यर्थं · तद्धितेष्वचामादिवृद्धेरवकाशः ऐतिकायनः औपगवः · उत्तरपदवृद्धेरवकाशः
द्विषाष्टिकः त्रिषाष्टिकः · इहोभयं प्राप्नोति व्याशीतिकः · उत्तरपदवृद्धिर्भवति विप्रतिषेधेन · कः पुनरत्र विशेषोऽचामादिवृद्धौ सत्या
मुत्तरपदवृद्धौ वा · अयमस्ति विशेषः · यद्यत्राचामादिवृद्धिः स्यादैजागमः प्रसज्येत · ॥ प्राचां ग्राम ॥ ॥ नगरस्य ग्रहणं किमर्थं · न प्रा
चां ग्रामाणामित्येव सिद्धं · न सिध्यति · अन्यो ग्रामः अन्यन्नगरं · कथं ज्ञायते · एवं हि कश्चित् कंचित्पृच्छति कुतो भवानागत इति · ग्रामा
त् · स आह · न ग्रामान्नगरादिति · ननु च यो ग्रामः य एव ग्रामः तन्नगरं · कथं ज्ञायते · लोकतः · ये हि ग्रामे विधयो नेष्यन्ते साधीयस्ते नग
वादयोरतुल्यबलत्वादिति वार्त्तिककारस्य विप्रतिषे रेण क्रियन्ते · तद्यथा · अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्यसूकर इत्युक्ते नतरां नागरे
धोपन्यासोऽनुपयुक्त इति चिंत्यमेतत् · यद्यत्रेति · सा च प्रतिषिध्येत तत्र तत्प्रतिषेधसन्नियुक्त ऐजागमः स्यादित्यर्थः · उत्तरपदवृद्धेस्तु यथात्र प्रतिषेधो
न भवति तथा न य्वाभ्यामित्यत्र प्रतिपादितं ॥ ॥ प्राचां ग्राम ॥ ॥ नगरस्य ग्रहणमिति · यद्यपि समुदायवचनोऽपि ग्रामशब्दोऽस्ति भूतग्राम इन्द्रियग्राम इति त
थापि जननिकायनिवासार्थत्वेनातिप्रसिद्धः अभक्ष्यो ग्राम्यकुक्कुटो ग्रामेणा [illegible] पेयमिति तदर्थस्यैव ग्रहणमिति मत्वा प्रश्नः · अन्यो हि ग्राम इति · विशेषे

= प्रतिपादितमित्यंतं तत्र त्वादचामादिवृद्धेरेव सन्निषेध इती निषेधविवरणं सतस्तत्र · पूर्वत्रैव जिंदे दोषप्रसंगात् · तस्मान्न य्वाभ्यामित्यत्राचामादेरनंतरस्तु यस्य यस्य वृद्धिर्विधीयते उत्तरपदस्यांगस्य वा तत्र प्रवर्तस्याचामा ·

चारण२

संस्त्याय विशेषमिति॰ सामान्यशब्दस्यादिप्रकरणवशाद्विशेषावस्थानं दृश्यते॰ संस्त्यायाद्यगमने निर्ज्ञाते विशेषपरिज्ञानाय कुत आगच्छतीति प्रश्ने ग्रामश
ब्दो विशेषवाची ग्रामशब्देन प्रयुक्त इति प्रतीयते॰ संस्त्यायो निवासः शालिकर्षकपुरुषप्रधानो देशो ग्रामः गोमहिष्यादियुक्तो घोषः प्राकारपरिखान्वितं श्रे
णीधर्मयुक्तसंस्थानं नगरं प्राकारपरिखायुक्तस्तु श्रेणिधर्मान्वितो देशः संवाहः। न च नगरशब्दसन्निधाने गोबलीवर्दन्यायेन विशिष्टग्रामग्रहणमसं

ग्रामेनाध्येयमिति साधीयो नगरेऽपि नाधीयते तस्माद्य एव ग्रामस्तन्नगरं कथं यदुक्तं एवं हि कश्चित्कंचित्पृच्छति कुतो भवानागत इति
ग्रामात्स आह॰ न ग्रामान्नगरादिति॰ संस्त्यायविशेषमसावाचष्टे॰ संस्त्यायविशेषास्ते ग्रामो घोषो नगरं संवाह इति॰ एवं तर्हि सि
द्धे सति यद्ग्रामग्रहणे नगरग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र ग्रामग्रहणे नगरग्रहणं न भवतीति॰ किमेतस्य ज्ञापने प्रयो
जनं विशिष्टलिङ्गो नदीदेशोऽग्रामा इत्यत्र नगरप्रतिषेधश्चोदितः स न वक्तव्यो भवति॰ यद्येतज्ज्ञाप्यते उदीच्यग्रामाच्च बह्वचोऽन्तो
दात्तादित्यत्र नगरग्रहणं कर्तव्यं॰ वाहीकग्रामेभ्यश्च नगरग्रहणं कर्तव्यं॰ दिक्छब्दाद्ग्रामजनपदाख्यानचानराटेषु नगरग्रहणं
कर्तव्यं॰ इदं चतुर्थं ज्ञापकार्थं तत्रातिनिर्बंधो न लाभः। तस्माद्यस्मिन्नेव ग्रहणे नगरग्रहणं नेष्यते तस्य प्रतिषेधो वक्तव्यः॥ ॥सं ग्रामम्
ख्यायाः संव॰॥ ॥संवत्सरग्रहणमनर्थकं परिमाणं तस्येति कृतत्वात् संवत्सरग्रहणमनर्थकं॰ किं कारणं॰ परिमाणं तस्येति
कृतत्वात् परिमाणं तर्ह्यसंज्ञाशाणयोरित्येव सिद्धं ज्ञापकं तु कालपरिमाणानां वृद्धिप्रतिषेधस्य॰ एवं तर्हि ज्ञापयत्याचार्यः कालप
रिमाणानां वृद्धि[redacted]र्न भवतीति॰
वाहादिनिवृत्त्यर्थं नगरग्रहणं संवाहादिनिवृत्तेरनिष्टत्वात् उदीच्यग्रामाच्चेति॰ मा नगरमित्यादौ भ्रान्त्यर्थं च वा
हीकग्रामेभ्यश्चेति शाकलिकइत्याद्यर्थं॰ दिक्शब्दा इति॰ पूर्वपाटलिपुत्रमित्यादौ पूर्वपदान्तोदात्तार्थं॰ अतिनिर्बंध इति॰ अतिगौरवं॰ न लाभ इति॰ ला
घवं॥ ॥संख्यायाः संव॰॥ ॥संवत्सरग्रहणमिति॰ कालः क्रियापरिच्छेदहेतुत्वात्परिमाणं न विशेषवाची संवत्सरशब्द इति भावः॥ ॥७॥ ॥

न्यायादिति·कस्तेषयेनाप्येकस्यांगस्य द्विकस्य एकः संस्कार इति [redacted] दधितआभ्यांदाभ्यामप्येकस्यौदनस्योपस्येककरणकः संस्कारस्तेनेहसमानफलकत्वमात्रेणबाध्यबाधकभावो ऽसत्यपिविरोधेऽस्तिभावः॥२॥

द्वैराचिकइति·द्वेराच्यौअधीष्टइतितद्धितार्थेसमासेराज्यहःसंवत्सराच्चेतिशारव विधानात्प्रक्षेत्र्न्त्रःद्वैसमिकइति·अधीष्टादिषुसमापाःस्वःद्विगोर्वेति
पक्षेत्र्न्त्रःअचामादेरिद्धिर्नस्यादिति·सत्यपिसंभवेबाधनंभवतीतिन्यायात्·अपरआहेति·पूर्वंविशेषविषयंज्ञापनमाश्रितमिदानीतुसामान्यविषयमि
तिभेदः॥द्विवर्षेति·द्वेवर्षेभूतानातमधीष्टइतित्र्न्त्रःतस्यवर्षाल्लुक्चेतिपक्षेलुक्द्विगोरितिङीप्प्रात्सोऽपरिमाणेतिप्रतिषिद्धः॥ ॥प्रवाह्॥ ॥पूर्वस्यतुवे

किमेतस्यज्ञापनेप्रयोजनं·द्वैराचिकःत्रैराचिकःअत्रवृद्धिर्नभवति·नैतदस्तिप्रयोजनं·नास्त्यत्रविशेषःससांवोत्तरपदवृद्ध्याव
ससांवा·इदंतर्हिद्वैसमिकःत्रैसमिकः॥इदंचाप्युदाहरणं·द्वैराचिकःत्रैराचिकः॥ननुचोक्तंनास्त्यत्रविशेषःससांवोत्तरपदवृद्ध्या
ईदि२ वससांवेति·अयमस्तिविशेषःयद्यचोत्तरपदवृद्धिःस्यादचामादेर्नस्यात्·अपरआह·ज्ञापकंतुकालपरिमाणानांपरिमाणग्रह
णस्य·एवंतर्हिज्ञापयत्याचार्यःकालपरिमाणानांपरिमाणग्रहणेनग्रहणंनभवतीति·किमेतस्यज्ञापनेप्रयोजनं·अपरिमाण
बिस्ताचितकंबल्येभ्योनतद्धितलुकिद्विवर्षात्रिवर्षा·परिमाणपर्युदासेनपर्युदासोनभवति॥ ॥प्रवाह्॥ ॥परस्यवृद्धिर्नेत्य
नुवर्त्ततेउताहोन·किंचातः॥यद्यनुवर्त्ततेप्रवाहणेयीभार्या॥स्येतिप्रवाहणेयीभार्यः॥वृद्धिनिमित्तस्येतिपुंवद्भावप्रतिषेधोन
प्राप्नोति·अथनिवृत्तं·नदोषोभवति·यथानदोषस्तथास्तु·अथवापुनरस्तुवर्त्तते·ननुचोक्तंप्रवाहणेयीभार्याअस्यप्रवाहणे
यीभार्यःवृद्धिनिमित्तस्येतिपुंवद्भावप्रतिषेधोनप्राप्नोतीति·नैषदोषः॥मामृदेवं·ज्ञातेनैत्येवंभविष्यति॥
स्तुनुवर्त्ततेनत्रयपरपूर्वस्यवृद्धिर्नास्तित
सेनत्तरपदस्यवृद्धिभावाभावयोः॥श्रुतोविशेषाभावाद्विशेषांतरजिज्ञासयाप्रश्नः॥परस्येति·प्रवाहणेयीति·अल्पादिभ्यश्चेतिढक्·ननुवृद्धेर्निमित्तंयस्मि
न्नणकारादिःसवृद्धिनिमित्तइत्याश्रितंततोस्मिन्नपिवृद्धौवृद्धिनिमित्तव्यपदेशस्यभावात्पुंवद्भावप्रतिषेधोनविष्यति·नैतदस्ति·प्रणकानांवृद्धिमु
त्पादयतामेववृद्धिंप्रतिनिमित्तत्वंनान्यथायथास्तुक्रमोरन्तात्मनेपदनिमित्तइत्यत्रसत्येवात्मनेपदेस्नुक्रमोरात्मनेपदनिमित्तत्वादिड्भावोनासतिज्ञाते

रिति·गोत्रंचचरणैःसहेतिजातित्वादनुवृत्तेनैवंप्रयोजनाभावः॥

यथातथा एतौ पदार्थानतिवृत्तौ ... वयथा ... वौ तथाभावमनतिक्रान्तं यथातथं सत्यं पुरा यथाभूतं यद्वस्तु तद्यथापि तथाभावमनतिक्रान्तं यथापुरं अत एव सूत्रे ह्रस्वनिर्देशः इति ... न एतच्च यथातथाभाव इति भाष्ये ॥ वितथ्यते तस्मान्न ... दीर्घपाठ एवोचित इति परं

विशिष्टो निपात इत्यर्थः सुखुपेति सत्यरूपार्थ इत्यर्थः

मा॰के॰ ६३

यथा॥ ॥नयथातथेति॰ यथातथेत्ययं निपातो॰ विपरीतार्थ वृत्तिरिति केचिदाहुः अन्ये तु यथातथाशब्दयोः समास एतदर्थः इत्याहुस्तेनो नञिति समासे कृते ब्राह्मणादिषु दर्शनात्ष्यञ् स्वरेपि नास्ति विशेषः आयथातथ्यमित्यस्य ञित्वादाद्युदात्तत्वाद्याथातथ्यमित्यस्याप्यव्ययपूर्वपदप्रकृतिस्वरत्वान्मूलयांतरार्थत्वेन लभवतिं अनभिधानादेतान्यां प्रत्ययान्तराभावात्॥ ॥आतो॥ ॥इहाविति॰ उत्तमस्यणल्लोणित्वाभावपक्षे श्राव काश्रमोत्वं णित्वेपरत्वाद्युग्बाधेत॰ अदायीति॰ सूत्रे चिण्णो निमि

यथातथा॰॥ ॥अयंयोगः शक्योऽवक्तुं॰ कथं॰ अयाथातथ्यं॰ आयथातथ्यं॰ अयाथापुर्यं आयथापुर्यं॰ यदा तावत्पूर्वपदस्य वृद्धिस्तदैवं विग्रहः करिष्यते॰ नयथातथाऽयथातथाऽयथातथाभावः अयथातथ्यं॰ यदोत्तरपदवृद्धिस्तदैवं विग्रहः करिष्यते यथातथाभावः याथातथ्यं नयाथातथ्यमयाथातथ्यं॥ ॥हनस्तो॥ ॥हंतेस्तकारेतद्धितेप्रतिषेधः॥ हंतेस्तकारेतद्धिते प्रतिषेधो वक्तव्यः॥ वार्त्रघ्नं

श्रौणघ्नः॰ उक्तं वा किमुक्तं॰ धातोःस्वरूपग्रहणे तत्प्रत्ययेकार्यविज्ञानात्सिद्धमिति॥ ॥आतोयुक्॥ ॥कृद्ग्रहणं किमर्थं॰ इत्याद्

द॰ ददौ॰ दधौ॰ नैतदस्ति॰ अचिण्णलोरितिवर्त्तते॰ यद्यचिण्णलोरितिवर्त्तते अदायीत्यत्र न प्राप्नोति॰ वचनाच्चिणि भविष्यति॰ अचि

ण्णलोरितिवर्त्तते॰ एवमपिचोऽडिबोन्त्वाकिरित्यत्र न प्राप्नोति॰ लोपोत्र बाधको भविष्यति॰ इदमिह संप्रधार्यं॰ लोपः क्रियतां युगिति

किमत्र कर्त्तव्यं॰ परत्वाद्युक्॰ एवं तर्ह्याचामादेरितिवर्त्ततेयत्राचामादिराकारस्तत्रयुगिति॰ एवमपिशादेवनाऽस्यस्यालीपाक

स्यज्ञः स्यालीपाकः अत्र न प्राप्नोति॰ तस्मात्कृद्ग्रहणं कर्त्तव्यं॥ ॥लोपात्तोप॥ ॥असत्यमिदमुच्यते॰ नाचमेरिति॰ अनाचमिकमिवमी

नत्वे नोपादानादचिण्णलोरित्यनुवर्त्तनाच्च विधिनिषेधयोः पर्यायः स्यात्॰ वचनादिति॰ आतो युक्चिण्कृतोरिति चिणः साक्षादुपादानान्निषेधो न भविष्यति॰ चिणि

विधिः अलक्ष्यशिष्टत्वादसंदिग्धो निषेधस्तु णलर्थ एवानुवर्त्तने अपि चिणपीति संदिग्ध इत्यसंदिग्धो विधिरेव प्रवर्त्तते॰ अचामादेरितिवर्त्तत इति॰ नत्वे

वं दद्मि ज्ञायके युक्प्राप्नोति एवं तर्हि दोषांतरोपन्यासादयं दोषो नोक्तस्तदाह॰ एवमपीति॰ आदिवज्ञावाच्च प्रसंगोयं धाद्यायइत्यादौ॥ ॥नोदा॥ ॥कामइति॰ आयादय

शिवः ६३

शाखा·॥ ॥पातेर्लुगिति·यद्यपिपालरक्षणात्मस्यपालयतीतिसिध्यतितथापिपातेःपुङ्निवृत्त्यर्थेलुगागमविधानंलुग्विकरणत्वान्तस्यधुँकोऽप्रसंगः॥ ॥प्रत्ययस्याकाः॥ ॥स्यग्रहणमिति·कादितिवर्णग्रहणंनचवर्णमात्रंककारःप्रत्ययोस्तीतिसामर्थ्यात्प्रत्ययावयवेप्रत्ययशब्दोवर्त्तिष्यतइतिप्रश्नः॥इतरःपृष्टांतरेप्रयोजनमास्यातुमाह·इदमिति·वक्ष्यमाणस्यवुध्याप्रसक्तीकृतपरामर्षः॥इत्यपीति·अन्यथादन्तिकेस्यास्यादवस्यादज्ञातापर्पविवक्षायामत्रकप्रत्ययः॥स्यग्रहणेतुक्रियमाणेसर्वत्र नवतिप्रत्ययस्यापिव्यपदेशिवद्भावेनप्रत्ययस्यत्वात्·असुबतइति·नसुबसुबदितिनञ्समासोऽसुपइत्यस्यबहुव्रीहित्वप्रदर्शनायभाष्यकारेणनाश्रितंतदाश्रयणेहिबहुव्रीहिरेवन्याय्योनतुमतुबंतसमासः॥तत्रायंप्रश्नः॥किमसुपइति

शाखा·॥ ॥णिच्चकरणेधन्त्रीजोर्लुग्वचनं·णिच्चकरणेधन्त्रीजोर्लुग्वक्तव्यः॥धनयतिं·प्रीणयति·पातेर्लुग्वचनं·पालयति·॥ ॥प्रत्ययस्याकास्सर्व·॥ ॥स्यग्रहणंकिमर्थं·इदंविचारयिष्यतेइतेकग्रहणंसंघातग्रहणंवास्याद्वर्णग्रहणंवेति·नयदासंघातग्रहणंतदास्यग्रहणंकर्त्तव्यंयदापियथास्याकारिकाणारिका·यदाहिवर्णग्रहणंतदाकेवलःककारःप्रत्ययोनास्तीतिसत्त्वावचनाद्भविष्यति·अथासुपइतिकथमिदंविज्ञायतेऽसुबंतोंगस्येत्याहोस्वि[redacted]न्चेत्सुपःपरआबितिकिंचातःयदिविज्ञायतेऽसुबंतोंगस्येतिबहुचर्मिकाअत्रनप्राप्नोति·अथविज्ञायतेनचेत्सुपःपरआबितिनदोषोभवति·यथानदोपस्तथास्तु॥

बहुव्रीहिराश्रीयतेनविद्यतेसुब्यस्मिंस्तदसुबितिअथतत्पुरुषःप्रसज्यप्रतिषेधश्चनचेत्सुपइति·प्रत्ययग्रहणेनतदंतविधेःसुबंतादितिबोद्धव्यं·बहुचर्मिकेति·बहूनिचर्माण्यस्यामितिबहुव्रीहिःप्रत्ययलक्षणेनसुबंतदंगमितीत्वंनप्राप्नोति·नलुमतांगस्येतिनिषेधोत्रनास्ति·लुमतालुप्तेयदंगंतस्य कार्येसप्रतिषेधःइदंतुशब्यंगं·नदोषोभवतीति·चर्मशब्दःसुबंतोनचतस्मात्परआप्व्यवधानात्·बहवःपरिव्राजकाअस्यांबहुपरिव्राजकेति·अत्रलुप्तप्रत्ययलक्षणेनसुबंतात्परिव्राजकशब्दात्परआबितिप्रतिषेधःप्रवर्त्तते·यथुदाप्याश्रयणेत्समासात्सुबंता

=स्थानिवद्भावादिति·नयाचाकानवत्तकावसंघातःसमवसेयेतिभावः।पात्त्रीयकार्येस्थानिवद्भावप्रसङ्गमवमादाह·अथवेति·५=

भा·के·
६४

इत्वेइति·यघकारां तस्यशब्दस्यकादितिनिर्देशस्ततःसंघातग्रहणंअथागंतुनाकारेणोच्चारणार्थेननिर्देशस्ततोवर्णग्रहणं·ननुवर्णग्रहणेस्यग्रहणान
र्थक्यात्स्यग्रहणात्संघातग्रहणेनभाव्यं·नैतदस्ति·कोत्रनिर्दोषःपक्षइति·विचार्यते·यदिवसंघातग्रहणंपक्षोदोषवांस्तन्माकारिस्यग्रहणमुपचयो
भविष्यति·एतिकारइति·एतदेऽकचिजासिस्यघघलेटापीतेचरूपं·अकेचोकारउच्चारणार्थेनश्रवणार्थस्तेनधक्किकिरकुदित्यादिसिध्यति·वचना
दिति·यथैवकारिकेसाद्यावेकादेशेकृतेऽनचेककारेसंपन्नेप्लुतपूर्वगतस्यानवलेवमकत्र्विधिस्त्वेकशब्दःसंघातउच्चारितइतितदाश्रयेत्वमप्राप्तिः
अस्तीति·एकादेशस्यपूर्वविधौस्थानिवद्भावात्·अपवादवचनादित्यस्यायमर्थः।नयासयोरितिवचनाज्ज्ञापकाद्भविष्यति·इतरस्त्वगृहीताभिप्रा

इदंविचार्यते·इत्वेकग्रहणंसंघातग्रहणंवास्याद्वर्णग्रहणंवेति·कश्चात्रविशेषः।इत्वेकग्रहणंसंघातग्रहणंचेदेतिकास्वप्रा
सा०दर प्तिः।इत्वेकग्रहणंसंघातग्रहणंचेदेतिकास्वप्राप्तिः।एतिकाश्वरंति·वचनाद्भविष्यति·अस्तिवचनेप्रयोजनं·किं·कारिकाहारिके
ति·अस्तुतर्हिवर्णग्रहणं·वर्णग्रहणंचेद्व्यवहितत्वादप्रसिद्धिः।वर्णग्रहणंचेद्व्यवहितत्वान्नप्राप्नोतिकारिकाहारिका·अका
×एकादेशेकृतेनास्ति× रेणव्यवहितत्वान्नप्राप्नोति·एकादेशःपूर्वविधौस्थानिवद्भवतीतिस्थानिवद्भावाद्व्यवधानमेव·एवंतर्ह्युदाहरणंप्रत्ययस्था
×अवधानं×× त्कात्पूर्वस्येति·नकश्चिद्व्यवधानंतत्रवचनाद्भविष्यति·वचनप्रामाण्यादितिचेद्रपकघादिष्वतिप्रसंगः।वचनप्रामाण्याद्
पआह·अस्तीति·ततस्त्वाभिप्रायमप्रकाश्यपक्षांतरमाश्रयति·अस्तुतर्हीति·व्यवहि दितिचेद्रपकघादिषुदोषोभवति·रथकघागर्गकाम्या।।
तत्वादिति·नत्वचापीसनेनककारेणविशेष्यते·किंतर्हिकारःआपिचपरतोऽकारस्यकात्पूर्वस्येतिव्यवहितस्यापिपूर्वत्वादित्वंप्रवर्त्स्यते·नैतद
स्ति·रथकघादावप्येवंप्रसंगात्·किंनकात्पूर्वस्येतिपूर्वग्रहणंकृतंतत्रापिपूर्वस्येति·ततश्चनिर्दिष्टपरिभाषोपस्थानाद्व्यवधानेनप्राप्नोति
तत्रवचनादिति·आनंतर्यमसंभवान्नाश्रीयते·रथकघेति·रथानांसमूहइतिइतित्रकघचश्चेतिकघचू·गर्गकाम्येति·गर्गमिच्छत्यात्मनइतिका

शिवः
६४

=निर्दिष्टपरिभाषावात्रापीसंयोगेनप्रवर्तनेपूर्वस्येतिविशेषणान्वयसामर्थ्यात्किंतत्रप्रत्ययान्वयेमानाभावो।,=पूर्वग्रहणमुत्तरपदान्वयीसन्निमानःतत्रकात्पूर्वस्येत्संशेंगविकल्पोऽव्यवधानांशःप्रवर्ततेऽतोमाधाकारस्येतंसर्विकेत्यादेः·पूर्वग्रहणंतुकत्वकेत्यादेःपरस्यतात्पर्यम्·२=

=अतएवनयामसमोरिति च रितार्थं ॥ वार्णादिति भिन्नस्थानिकत्वात् ॥ आयो नित्ये यावता कादेशे ...

येननाव्यवधानमिति नानंतर्यं परित्यज्यते किंतु यावत्संभवति तावदाश्रीयते यथैवमेति काइत्यत्र यामामकारान्तां व्यवधानादित्वं न प्राप्नोति एकस्तकारसंबंधकारे द्वितीयस्तदादीनामइत्यकारः नैष दोषः द्वयोरकारयो [redacted] रेकादेशे कृते तयोपासहैकादेशस्य स्थानिवत्वादेकेनैवाकारेण व्यवधानं न पुनः स्थानिवत्प्रतीतिर्यतो द्वावकारौ व्यवधायकौ स्यातां सकृत्प्रवृत्तिलक्षणस्यचैरितार्थत्वात् व्यपवर्गाभावादिति वार्णादांगं बलीय इत्येतदनाश्रित्यैकं उभयत इति आपियः कथामित्येव मुभयमाश्रीयते अथवापि परतोऽकारस्याकारस्य सर्वस्येत्याश्रयिष्यते तथापुभयमेवाश्रितं तुल्यकालं भवति एवं जाती

नैष दोषः येननाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात् केन च नाव्यवधानं वर्णेनैकेन संघातेन पुनर्व्यवधानं भवति न च भवति अथवा पुनरस्तु संघातग्रहणं ननु चोक्तमित्येकग्रहणं संघातग्रहणं चेदेतिकास्वप्राप्तिरिति परिहृतमेतत् वचना द्भविष्यतीति ननु चोक्तमस्मिन्वचने प्रयोजनं किं कारिकाहारिकेति अत्राप्येकादेशे कृते व्यपवर्गाभावान्न प्राप्नोति अंतादिवद्भा वेन व्यपवर्गः उभयत आश्रयेनांतादिवत् एवं तर्ह्येकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यपवर्गः एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञाप यति भवत्येवं जातीयकानामपीत्वमिति यदयं न यासयोरिति प्रतिषेधं शास्ति मामकनरकयोरुपसंख्यानं कर्त्तव्यं मामि का नरिका किं पुनः कारणं न सिध्यति अप्रत्ययस्थत्वात् त्यक्त्यपोश्च [redacted] प्रतिषिद्धत्वात् त्यक्त्यपोश्चोपसंख्यानं कर्त्तव्यं दाक्षिणात्यिका इहत्यिका किं पुनः कारणं न सिध्यति प्रतिषिद्धत्वात्

यकानामिति प्रकारवचने जातीयर् प्रत्ययः अकज्वतामिसर्पः मामिके ति ममेयं युष्मदस्मदोरन्यतरस्यां खञ्चेत्यन्यतरस्यां ग्रहणान्नाग्नीयतो णित्यण् तवकममकावेकवचने इति ममकादेशः केवलमामकेत्यनेन संज्ञायां दसो ङीपो नियमादन्यत्र टाप् नरंकायतीति नरिका दाक्षिणात्यिकेति दक्षिणस्मिन्देशे दक्षिणाद्दक्षिणादाच् तत्र भवा दक्षिणापश्चात्पुरसस्त्यगिति त्यक् अत्र तापर्यविवक्षायां कः इहत्यवाइहत्यिका अव्ययात्त्यप् पूर्ववत् कः उदीचामातइति पाक्षिकप्रति

एवं चावकापितदेवत्येऽनिनकत्वमितिग्रहोभिसंधिः

भा॰कै॰

६५

हृत्संधेः प्रत्ययस्थात् एतदंशोनाश्रीयते

नयासयोः॥ ॥यासेति प्रथमैकवचनांतयोरूपादानाद्विभक्त्यंतरे प्रतिषेधाप्रसंगादाह॰यत्तदोरिति॰उपत्यकेति॰उपाधित्यकासन्नारूढयोरितित्यकन्॰नैवंजा
तीयकानामिति॰येनेकाचो व्यंजनादयः प्रत्ययाः संज्ञाविषयास्तेषामित्यर्थः॥यदयमिति॰ननुचन्तुगर्थमिकारोच्चारणंस्यात्‌अन्यथापंचभिर्नत्तिकाभिः क्रीतम्‌
तार्हादिति ष्ठकोऽध्यर्द्धपूर्वेतिलुकि कृतेलुक्तद्धितलुकीति लुकि टापोलुकिनिमित्ताभावादित्वंनस्यात्संचमनिकइति॰अंतरंगांश्चविधीन्सर्वोलुग्बाधते नलु
लुगेवं॰तथाचसनीत्यस्य इत्यादौ नलोपोनभवति पंचभिःखट्वाभिःक्रीतः पंचखट्वइत्यादौ टापासहैकादेशे न भवति॰अन्यथैकादेशस्यादिवद्भावादाद्ग्रहणेनग्र

नयासयोः॥ ॥नयत्तदोरितिवक्तव्यं॰इहापि यथास्यात्॰यकांयकामधीते तकांतकांपचामहे इति॰प्रतिषेधे त्यकनउपसंख्यानंकर्त्तव्यं॰अ
धित्यका॰उपत्यका॰तन्नत्युपसंख्यानंकर्त्तव्यंनकर्त्तव्यं॰आचार्यप्रवृत्तिर्ज्ञापयति नैवंजातीयकानामित्वंभवतीति यदयंमद्कन्निती तन्न
तस्यनिर्देशं करोति॰पावकादीनां छंदसि॰उपसंख्यानंकर्त्तव्यं॰हिरण्यवर्णाः शुचयःपावकाः॰ऋक्षाअलोमकाः॥छंदसीतिकिम
र्थं॰पाविकाअलोमिका॰आशिषिचोपसंख्यानंकर्त्तव्यं॰जीवतात्जीवका॰नंदतात्नंदका॰भवतात्भवका॰उत्तरपदलोपेचोपसंख्या
नंकर्त्तव्यं॰देवदत्तिका देवका॰यज्ञदत्तिका यज्ञका॰क्षिपकादीनांचोपसंख्यानंकर्त्तव्यं॰क्षिपका॰ध्रुवका॰धुवका॰चटका॰तारका
ज्योतिषि॰उपसंख्यानंकर्त्तव्यं॰तारका॰ज्योतिषीतिकिमर्थं॰तारिकादासी॰वर्णकातांतवे॰उपसंख्यानंकर्त्तव्यं॰वर्णका॰तांतवइतिकिमर्थं॥

हणंस्यु किं कृते॰कारस्याश्रवणंनस्यात्॰तदेवंसति प्रयोजनेनज्ञापकमिकारोच्चारणमिति चिंत्यमेतत्॰त्यिकन्निति प्रक्रियालाघवायस्त्री विषयत्वाद्कव्येत्स
कन्नित्यकारोच्चारणमित्यभावस्यनज्ञापकं॰पंचभिरुपत्यकाभिःक्रीतः पंचोपत्यकइत्यादौ तद्धितलुक्यकारश्रवणार्थत्वात्तस्य॰पावकाइति॰पुनातिपावयतिवा शिव॰
पावकाः॥जीवकेति॰आशिषिचेतिवुन्॰देवकेति॰अनजादौविभाषालोपोवक्तव्य इतिद्वितीयस्यलोपः॥क्षिपकेति॰क्षिपेरिगुपधलक्षणेके कृते अज्ञातादिषुकः॰अथ ६५
वाकुन्शिल्पिसंज्ञयोरिति कुन्॰ध्रुवकेति॰ध्रुगतिस्थैर्ययोः॥धुवकेति॰धूविधूनने॰वर्णकेति॰वर्णयति महत्वादिकंगुणमिति वर्णकाभावार विशेषणंतत्तंतांविकारस्तांतवंआवरणमित्यर्थः॥

=लिंगमिति॰प्रत्ययोत्तरपदयोश्चेत्यस्यविशेषवि वयत्वेन सुलुग्विषयेरक्षापकत्वं तिकन्नितीकारोच्चारणंतु भाष्योक्ते तानामज्ञापकमित्येतत्‌लुग्विषयमपि ज्ञापकमस्तु यावता वचनमचरितार्थंतस्य सर्वस्यलोपनीयत्वादितिभगवतो

वर्त्तिकेति· आख्यात्रीत्यर्थः। भागुरी टीकाविशेषः। अष्टकेति· इष्टकशिम्यां तकन्निति तकन्। पितरस्त्र देवताः पितृदेवतास्तदर्थं कर्म पितृदेवसंदेवतां तास्तादर्थ्ये यदिति य
त्। अष्टिकेति· अष्टौ परिमाणमस्याः संख्याया अतिशदन्ताया इति कन्। सूतकेति· न सामिवचन इति प्रतिषेधाज्ज्ञापकात्स्वार्थे कन्। पुत्रिकेति· पुत्रशब्दाच्छान्द
स्वादित्वाद् ङीन्न स यस्तत स्वार्थे कन्। केऽण इति ह्रस्वः तस्य पक्षे इकारो विधीयते। वृन्दारिकेति· वृन्दमस्या अस्तीति शृङ्गवृन्दाभ्यामारकन्न स योवक्तव्य इत्यारक
न्॥ ॥उदीचामातः॥ ॥स्त्रीविषय इति· अर्थगतं स्त्रीत्वं शब्दे समारोप्य निर्देशः कृतः। शुभंयिकेति· शुभंयातीति क्विप्। शुभंय इत्यखण्डो निपातो

वर्त्तिका भागुरी लोकायतस्य· वर्त्तका शकुनौ प्राचामुपसंख्यानं कर्त्तव्यं· वर्त्तका शकुनिः। शकुनाविति किमर्थं· अष्टिका खारी· वास्तुतका
पुत्रकावृन्दारकाणामुपसंख्यानं कर्त्तव्यं· सूतका सूतिका पुत्रका पुत्रिका वृन्दारका वृन्दारिका॥ ॥उदीचामातः स्थाने॥ ॥किमर्थं स्त्री
लिंगनिर्देशः। क्रियतेन यकपूर्वस्य स्त्रैवोच्येत· स्त्रीविषयो य आकारस्तस्य स्थाने योऽकारस्तस्य प्रतिषेधो यथा स्यादिह मा भूत्· शुभंया
तिः शुभंयाः। शुभंयिका· भद्रंयातिभद्रंयाः भद्रंयिका· यकपूर्वे धात्वन्तप्रतिषेधः। यकपूर्वे धात्वन्तप्रतिषेधो वक्तव्यः। किं प्रयोजनं· सुनयि
का अशोकिका अपाकिका॥ ॥भस्त्रैषाजाज्ञा॥ ॥एषाद्वे नञ्पूर्वे अनुदाहरणे असुप इति प्रतिषेधात्। अथ भस्त्राग्रहणं किमर्थं
×वर्त्तिका भागुरी लोकायतस्य· भाचामिति किमर्थं· वर्त्तिका· अष्टका पितृदेवत्ये उ× न अभाषितपुंस्कादित्येव सिद्धं· भस्त्राग्रहणमुपसर्जनार्थं उपसर्जनार्थोयमारम्भः
×पसंख्यानं कर्त्तव्यं· अष्टका· पितृदेवत्य इति किमर्थं·×
अज्ञाताद्यर्थविवक्षायां कः केऽण इति ह्रस्वः। यकपूर्व इति· धात्वन्ताभ्यां यकारककाराभ्यां परस्यातः स्थानेऽकारस्येत्वप्रतिषेधस्य प्रतिषेधस्तेनेत्वं भवत्येव· शोभनो न
यो यस्याः सुनयाना स्त्रीशोको ऽस्या अशोका· पूर्ववत् कः॥ ॥भस्त्रै॥ ॥पाक्षिकप्रतिषेधार्थ आरम्भः। एषाद्वे इति· न एषका न द्वके इति विग्रहान्न रंगानपि विधीन्बहि
रंगोल्लुग्बाधत इत्यस्य कृतेषु सदाद्यसादिषु समासे कृते सुब्लुकि च समासाद्या विभक्तिस्तस्यां सदाद्यत्वं तत स्टाप्सु च प्रत्ययलक्षणेन सुबन्ताभ्यां परत्वात्सुप इ
त्येत्वप्रतिषेधस्य व्यापाराद्नेषकाद्येव न भवतितस्मान्नञ्पूर्वयोरेवैतयोः पाक्षिकः प्रतिषेधः। एषका एषिका द्वके द्विके इति एषेति प्रथमैकवचननिर्देशादन्यत्र

अमन्त्रिकेति॰ नास्ति मन्त्रा अस्या इति बहुव्रीहावुपसर्जनह्रस्वे तेच कृते यथा बुसघते सञ्जाषितपुंस्कादनन्त्रस्य ह्रस्वः इत्युत्तरसूत्रेण पाक्षिकप्रतिषेधप्रसंगात् कस्या ग्रहणं॰ नञ्पूर्वग्रहणमनर्थकमिति॰ अपिग्रहणेन केवलानां समुच्चयात् अन्यपूर्वाणामप्रसंगात् कर्तव्यं नञ्पूर्वग्रहणं॰ तत्रैव पदांगाधिकारे तस्य च तदुत्तरपदस्य च ग्रहणं सर्वेष्टसिद्धिः॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते समसमाध्यायस्य तृतीये पादे प्रथममाह्निकं॥ ॥ ठस्येकः॥ ॥ किमिदमिति॰ किं व्यंजनमात्रं प्रतिपिपादयिषितं आगंतुना तूच्चारणार्थेन अकारेण निर्देशोथ संघात एव स्थानी निर्दिष्ट इति प्रश्नः॥ धातं तं प्रतिषेध इति॰ संघातग्रहणे तेषु न दोषः प्र

अमन्त्रिका अमन्त्रका॰ नञ्पूर्वग्रहणमनर्थकं चोत्तरपदमात्रस्येद्वचनात्॰ नञ्पूर्वग्रहणं चानर्थकं किं कारणं॰ उत्तरपदमात्रस्येत्वं वचनात्॰ उत्तरपदमात्रस्येत्वं वक्तव्यं निर्मन्त्रिका निर्मन्त्रका बहुमन्त्रिका बहुमन्त्रका॰॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य तृतीये पादे प्रथममाह्निकं॥ ॥ ठस्येकः॥ ॥ किमिदं ठादेशे वर्णग्रहणमाहोस्वित्संघातग्रहणं॰ कश्चात्र विशेषः॥ ठादेशे वर्णग्रहणं चेद्धातं तं प्रतिषेधः॥ ठादेशे वर्णग्रहणं चेद्धातं तस्य प्रतिषेधो वक्तव्यः॥ पठितापठितुं॰ अस्तु तर्हि संघातग्रहणं॰ संघातग्रहणं चेदुणादिमाथितिकानां प्रतिषेधः॥ संघातग्रहणं चेदुणादिमाथितिकानां प्रतिषेधो वक्तव्यः॥ उणादीनां तावत्॰ कंठः॥ शंठः॥ वंठः॥ इत्यमथितं पण्यमस्य माथितिकः इसकारलोपे कृते तां

ठतील्यत्रापि ठस्यानर्थकादर्थवत्परिभाषया अर्थवत्संघातग्रहणादप्रसंगः॥ वर्णग्रहणे त्वर्थवद्ग्रहणपरिभाषाया अव्यापारः॥ वर्णग्रहणपक्षे ठगादिषु कारउच्चारणार्थो वर्णमात्रप्रत्ययः॥ कंठ इति॰ कणेष्ठः॥ शंठ इति॰ शमेः शमिदाम्युस्त्रितिठः॥ वंठ इति॰ वनोमेस्योपि ठस्य तत इति ठः॥ वर्णपक्षेप्युणादीनां प्रसंगः॥ सत्यपि संघातस्य प्रत्ययत्वे इहुरुच संघातग्रहणे ठगादयः संघाता एव प्रत्ययाः प्रतिज्ञायंते॰ माथितिक इति॰ सन्निपातपरिभाषा मनाश्रित्य चोद्यते॰ अन्यथा ञादिसन्निपातेन कथमञादिविघातनिमित्तं स्याद्वर्णग्रहणे त्वनल्विधाविति स्थानिवत्त्वनिषेधादिकस्य कादेशप्रसंगः॥ ननु तां तादगात्परस्य ठस्य कादेशो विधीयते न चैतत्तकारांतमंगं तकारांतात्

=अर्येति·भावंतस्मन्निरुसर्षपंचम्यंत स्येतीपमोगादित्विभावः॥१=आमर्थ्यादिति·पंचम्यंतस्यान्वयामेत्मतादिसर्थः॥२=छादिति·तद्धितावयवस्यव्यंजनमात्रस्यठस्यादेशोधातंतमाथ्येकयोर्दोषाभावेपिकर्मठइसचातिप्रसंगइत्यादिग्रहणंकृतं·३=

ग्रा०

पत्वनिपातनेवृद्धिंबाधित्वेकारस्यलोपेसतिसन्वद्भावस्या अग्लोपिप्रतिषेधानर्थक्यंचस्थानिवद्भावात्॰अग्लोपिप्रतिषेधश्चानर्थकः॥किंकारणं॰स्थानि
प्रसंगात्॰अनाश्रित्यज्ञापकंत्वत्वनिपातनमुक्तं॰ज्ञापकाश्रयणेनुआपः॥पडुमान्यदपुपटदित्यादावकृतायांवृद्धौलोपेसतिसन्वद्भावाभावार्थं॰अयवेति॰हलिकल्योर
त्वनिपातनमेवज्ञापकंलोपात्पूर्वंवृद्धिर्भवति॰णिलोपस्तुवाचनिकेनपूर्वविप्रतिषेधेनवृद्धेःपूर्वंभवति॰एवंपडुमाख्यदपीपटदितिसन्वद्भावप्रसंगात्प्रत्याहा
रग्रहणमेवज्ञापकमाश्रयणीयं॰तेनवृद्धेःप्राग्लोपोविधेयः॥॥नाग्लोपि॰॥॥मालामाख्यदममालदित्यादौटिलोपस्यस्थानिवत्त्वादनुपधात्वात्प्रतिरेवकृतस्वस
नास्तीतिप्रतिषेधोनर्थकः॥ननुप्रतिषिध्यतेतत्रस्थानिवत्त्वंकिंतुउपधात्वचस्वरनित्यसकुत्वेप्विति॰नैतदस्ति॰परदर्थःसप्रतिषेधस्तस्यणेर्णिच्युपसंख्यानमिप

अग्लोपीति॰२

हलचोरादेश इति॰ यथा सुधातुरकङ् इत्यादेशे समुदाये ऽवयवस्यानादेशत्वादणो रपरत्वं न भवतीत्यौधातकिरिति॰ तथा समुदाये स्थानिन्यवयवस्यास्थानित्वादजादेश
त्वाभावान्नास्ति स्थानिवद्भावः। किं पुनरिति॰ अवयवात्मकता समुदायस्य तस्मिन्स्थानिन्यवयवा नामपि स्थानित्वादजादेशत्वान्याय्य एव स्थानिवद्भावः। तथा च
खट्वर्श्य इति स्थानिकत्वाश्रयणे रपरत्वं भवतीति भावः। इतरः पूर्वोक्तेनाभिप्रायेणाह॰ अजादेश इति॰ इतरस्त्वनुमीयमानो वक्ष्याश्रयितव्यः स्थान्यादेशभा
व इति मत्वाह॰ अल्लोपिनामिति॰ इत उत्तरमिति॰ पंचपाद्यामित्यर्थः। पूर्वत्रासिद्ध इति॰ तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति वक्तव्यमेव॰ यदा ज्ञापकत्वादि
ताविषयो नित्यत्वादिति संयोगादिलोपलत्वणत्वेषु स्थानिवद्भावो भवत्येव॰ अचः परस्मिन्नित्यत्र विचारितं हलचोरादेशः स्थानिवदिति चेद्विंशने क्लिलोप

यत्र तर्हि स्थानिवद्भावो नास्ति तदर्थमयं योगो वक्तव्यः। क्व च स्थानिवद्भावो नास्ति यो हलचोरादेशः अस्रन्राजत्। किं पुनः कारणं हलचोरादेशो न स्था
निवदित्युच्यते॰ अजादेशः स्थानिवदित्युच्यते न चायमच एवादेशः। किं तर्हि च अन्यस्य चादेशः। अल्लोपिनां नेत्यपि तर्हि प्रतिषेधो न प्राप्नोति॰ किं
कारणं॰ अल्लोपिनां नेत्युच्यते॰ न चात्राग एव लुप्यते किं तर्ह्यकारान्यश्च॰ योऽत्राल्लुप्यते तदाश्रयः प्रतिषेधो भविष्यति॰ यथैव तर्हि योऽत्राल्लुप्यते तदा
श्रयः प्रतिषेधो भविष्यति॰ एवं योऽत्राज्लुप्यते तदाश्रयः स्थानिवद्भावो भविष्यति एवं तर्हि सिद्धे सति यदल्लोपिनां नेति प्रतिषेधं शास्ति त
ज्ज्ञापयत्याचार्य इत उत्तरं स्थानिवद्भावो न भवतीति॰ किमेतस्य ज्ञापने प्रयोजनं॰ पूर्वत्रासिद्धे न स्थानिवदित्युक्तं तन्न वक्तव्यं भवति॰ यद्ये
तज्ज्ञाप्यते आदीध्यतेः

एकादेशे इत्यादि तत्र निर्णीतं हलचोरादेशो न स्थानिवदिति॰ इह तु प्रतिषेधवचनसामर्थ्यान्न ज्ञापनायोक्तमिति ग्रन्थविरोधस्तस्मात्प्रा
श्रयेण हलचोरादेशो न स्थानिवदित्ययं पक्षो गाथ इत्यस्त्वभ्युपेत्य स्थानिवत्त्वज्ञापकमाश्रितं॰ शिष्यव्युत्पादनाय शास्त्रितोऽपि पक्षः॰ क्वचिदुपन्यस्यत इत्येवं विरोधः परिहृत
र्यः। अल्लोपिग्रहणसामर्थ्याच्च समुदायलोपेऽप्यल्लोपमाश्रीयते केवलाल्लोपे प्रतिषेधस्यानर्थक्यात्॰ खट्वर्श्य इत्यत्र त्वेकः पूर्वपरयोरित्यवयवावेवशाद्धेनचोदितावितिर
परत्वं प्रवर्तते॰ न इत्युक्तं योरुभयोः षष्ठीनिर्दिष्टयोः स्थाने भवतीति लभ्यते सा वन्यतरतोऽव्यपदेशामिति॰ आदीधक इति॰ दीधीणिचूदीधीवेवीटामिति प्रतिषेधस्तेनो एवुलि णिलोपे कृते तस्य
स्थानिवद्भावाद्धीवर्णयोरिति लोपो न स्या

=आनर्थक्यादिति॰ अमभागादित्यादौ हल्स्थानिवत्वादेव हल्व्याभावः। च स्थपरन्निहासेनप्रतिषेधस्तु लंपतप्रकृतिकत्वं तार्थ इत्युक्तमिति भावः। भवानपाक्तिनिर्देशात्तत्वनवक्तव्यः। कातिआस्यन्दवानदपपदादिलादावपि स्थानिवत्वादेवक्त्वनिवेधाभावादित्यपिदेः। भावा। १२८

=असरउज्ज्ञादिमाद्यैस्थानिवत्त्वाभावात्·२ =इतिशिष्टस्वरबलीयस्त्वमत्रविकरणेभ्यश्लुके·।१=

यत्त्रस्तुनीहत्त्रेति·निङुः तिङ्ङितिनिघातोनिपातैर्यद्यदीतिनिषिद्धःहेरपित्त्वादाद्युदात्तत्वाल्लविकरणस्वरोनसार्वधातुकस्वरंबाधतइतिश्नास्वराभावः तत्रयणादेशेकृतेउदात्त
त्वाभावात्स्थानिवत्त्वाभावाच्चनिघातोनप्राप्नोति·वर्णग्रहणसामर्थ्यादिति·वर्णग्रहणंकृतपूर्वंगतिराश्रीयते·अंतरंगत्वात्तुलोपेकृतेवर्णग्रहणंज्ञापकमकर्तुं·तत्तुकेचिज्ज्ञा
पकंवर्णयंतिउत्तरत्रस्थानिवत्त्वाभावस्य·अल्लोपिग्रहणंतुसतिप्रयोजनेनज्ञापकमस्यार्थस्य·अंतरंगःस्वरइति·यद्यप्युभयंपदद्वयाश्रयंतथापिपूर्वमुपसर्गेणसं
बंधःपश्चादधिकरणवाचिनात्रशब्देनेतियणादेशोबहिरंगः॥ ॥भाज·॥ ॥काण्यादीनांवेति·आदिशब्दःप्रकारे·येषांद्वस्वविकल्पोदृश्यतेतेकाण्यादयःकाणिराणि

णीवर्णयोर्दीर्घीवेव्योरितिलोपोनप्राप्नोति·इहचयत्स्रस्तुनीहत्रेतिङि·चोदात्तवतीत्येषस्वरोनप्राप्नोति·नैषदोषः।यस्मादिदमुच्यते·आदीधयतेरादीधकः
आवेवयतेरावेवकः·यीवर्णयोर्दीधीवेव्योरितिलोपोनप्राप्नोतीति·यीवर्णयोरितिवर्णग्रहणसामर्थ्यान्नभविष्यति·यदप्युच्यते·यत्स्रस्तुनीहत्रेति
ङि·चोदात्तवतीत्ये[illegible]षस्वरोनप्राप्नोतीति·बहिरंगोयणादेशोंतरंगःस्वरःअसिद्धंबहिरंगमंतरंगे·॥ ॥भाजभाष·॥ ॥काण्यादीनांवेतिकृकार्यं
केपुनःकाण्यादयः।काणिराणिश्राणिभाणिहेठिलोपयः।अचकाणत्·अचीकणत्·अरराणत्·अरीरणत्·अशिश्रणत्·अशश्राणत्
·अबभाणत्·अबीभणत्·अजिहेठत्·अजीहिठत्·अलुलोपत्·अलूलुपत्·॥ ॥द्यते·॥ ॥इणवद्दिग्यातेवदिग्यिरे·दिग्यादेशे
कृतेद्विर्वचनंप्राप्नोति·तत्रसाभ्यासस्येतिवक्तव्यं·ननुचद्विर्वचनेकृतेसाभ्यासस्यदिग्यादेशोभविष्यति·॥ दिग्येव ॥७॥ ॥७॥ ॥७॥

श्राणिभाणिहेठिलोपिप्रभृतयः॥ ॥दय·॥ ॥दिग्यादेशेकृतेइति·यद्यपिनाप्राप्तेद्विर्वचनेदिग्यादेशआरभ्यतेतथापिबाध्यबाधकभावेहेतंलक्षणंवालक्ष्यंवालक्षणेनबाध्यतेलक्ष्यं
वा·तत्रयदाद्विर्वचनशास्त्रंदिग्यादेशशास्त्रेणबाध्यतेतदादिग्यादेशेकृतेनास्तिद्विर्वचनप्रसंगःयदातुलक्ष्यंबाध्यतेतदातस्यद्विर्वचनंदिगिनाबाध्यतेदिगेस्तु
तत्वाप्नोति·शास्त्रस्याबाधितत्वात्·ततश्चयथाचख्याविलादौख्याञादेशेकृतेद्विर्वचनंभवतिएवंदिग्यादेशेकृतेप्राप्नोति·साभ्यासस्येति·तेनकृतेद्विर्वचनेदि
ग्यादेशोनचपुनर्द्विर्वचनंभवतिसकृत्प्रवृत्तलक्षणस्यचरितार्थत्वात्साभ्यासग्रहणसामर्थ्याच्च·ननुचेति·पूर्वंविप्रतिषेधात्कल्प्यसिद्धयेश्रम्मक्रमाश्रयणादेतिभावः॥

=विप्रेवंकार्यमिलर्पः·

×सकृद्गतन्यायेनैवं दिग्यादेशो द्विर्वचनस्सतयाबाधकः ग्रन्थकारोऽप्यकथयत्पुनः प्रसंगा दिति इतरोऽप्युपगम्यतावाद्विप्रतिषेधं ×२

न सिध्यतीति विप्रतिषेधे परं कार्यमित्यस्मिन्व्यवस्था हेतौ सत्येष क्रमो दुर्लभः। तत्र द्विर्वचनस्यावकाशः पपाचेति दिग्यादेशस्य कृते द्विर्वचने द्वयति सद्भावाद् कृते तु द्विर्वचन उभय प्रसंगे परत्वाद्दिग्यादेशः। एवं तर्हीति नाप्राप्ते द्विर्वचने दिग्यादेशस्यारंभात् इत्यस्तु तद्बुद्धिपरीक्षार्थं विप्रतिषेधाश्रयेण सकृद्गतन्यायाश्रितात् पुनः प्रसंग इति चेदिति यथापूर्वं ब्राह्मणकुलानि प्रविशन्नित्यस्मादेशे शिशीलुङ्क्ष्णोनभवं सेवं दिग्यादेशे कृते द्विर्वचनाभाव इदानीं न्याय्यं परिहारमभिधातुमाह अथवेति क्वचित्सागौ नैष युक्तः परिहारो विप्रतिषेधे पुनः प्रसंग इति योयमदुक्तस्यार्थस्य दिग्यादेशो द्विर्वचनं बाधिष्यत इत्यस्य तया परिहारोऽभिहितः पुनः प्रसंगविज्ञानाद्द्विर्वचनं प्राप्नो

न सिध्यतीति किं कारणं दिग्यादेशस्य परत्वात् सा भ्यासस्यादेशवचनं। दिग्यादेशः क्रियतां द्विर्वचनमिति परत्वाद्दिग्यादेशेन भवितव्यं। न च सा भ्यासस्येति वक्तव्यम्। एवं तर्हि दिग्यादेशो द्विर्वचनं बाधिष्यते। पुनः प्रसंगाद्द्विर्वचनं प्राप्नोति। पुनः प्रसंगादिति चेत् स्मादिभिस्तुल्यमेतद्भवति। न यथा मा द्विष्कृतेषु पुनः प्रसंगात् शिशीलुङ्क्ष्णोनभवंति एवं दिग्यादेशे कृते पुनः प्रसंगाद्द्विर्वचनं न भविष्यति। अथवा विप्रतिषेधे पुनः प्रसंग इत्युच्यते। विप्रतिषेधश्च द्वयोः सावकाशयोः इह पुनर्नवकाशो दिग्यादेशो द्विर्वचनं बाधिष्यते। यदि तर्ह्यनवकाशा विधयो बाधका भवंति। बभूवेत्यत्राभावादेशो द्विर्वचनं बाधेत। सावकाशोऽभावादेशः। कोऽवकाशः भविता। भवितुं इह तर्हि चिक्लिदुः रुरावाऽज्वालिटीतिरुद्भ्यो द्विर्वचनं बाधेत। इह चापि बभूवेति यदितावस्थाने द्विर्वचनं भावः

तीति सन्नमुक्त इत्यर्थः। अनवकाशो दिग्यादेश इति पूर्वं सामान्यविशेषभावमनाश्रित्योभयोः सावकाशत्वमुक्तं इदानीं तु सामान्यविशेषाश्रयेणाप्राप्ते द्विर्वचनआरंभा त्तस्य दिग्यादेशस्यापवादत्वमुच्यते। यदि तर्हीति नन्ववश्यमनवकाशेन बाधकेन भाव्यं अन्यथा न कश्चिद्बाधकः स्यात् एवं तर्ह्यनवकाशाभिमता अनवकाशा इत्यर्थो विवक्षितो नैवायमनवकाशः कृतेऽपि द्विर्वचने प्रवृत्त्यविघातात् अथ पुनरेवमप्यनवकाशं मन्यसे तदा लक्ष्यदोषप्रसंगः। बभूवेति अभावादेशः सावकाश इति यत्र द्विर्वचनाभावः इह तर्हीति आचख्याविसत्र कृते द्विर्वचने स्यान्नःप्रवर्तनादनवकाशता भावोऽयं यद्यपि तु येननाप्राप्तन्यायेनानवकाशत्वमस्तु पर्गीतेर्व्या

द्विर्वचनप्रकरणं॥

=असंजेयादेवसबाधप्रयोजकइतिवार्तिकमतेबाधप्रयोजकतयातमनाश्रित्येसत्यर्थः। इदानींलिति सत्यपिसंभवेबाधनं न वर्ती दिग्याप्यतेइत्यर्थः॥=

भा॰के॰ ७९

सर्वादेश [redacted] इति॰ स्थानिवद्भावादस्ति ग्रहणेन ग्रहणात्कार्यकृतत्वाच्च पुनर्द्विर्वचनाभावादिष्टरूपासिद्धिः। पूर्वस्य श्रवणमिति॰ अयं दोषो नोत्सर्गापवादपक्ष
उपात्तो ऽभावस्यावकाशदर्शनेनोत्सर्गापवादभावनिराकरणाद्द्वयोस्तु सावकाशयोः परत्वाद्द्विर्वचने कृते बभूवेति न सिध्यतीति प्रतिपाद्यते॰ न चार्द्धधातुक
सामान्य इति॰ द्विर्वचननिमित्तस्य लिटो ऽनुपजातत्वादसति विप्रतिषेधे पूर्वं भावः पश्चाल्लिटि परतो द्विर्वचनमित्यदोषः। योयतः प्राप्नोतीति॰ विषयस
प्तमीफलं ज्ञापितं स्यात्॥ विधावपि विषयसप्तम्याश्रीयते इतियेन नाप्राप्त इत्यस्यानवकाशत्वात्कृते स्यात्ततो द्विर्वचनं भवस्येव॰ दिग्पादेशेनुलिटीति परसप्त

सर्वादेशः प्राप्नोति॰ अथ द्विःप्रयोगो द्विर्वचनं परस्य भावे कृते पूर्वस्य श्रवणं प्राप्नोति॰ नैष दोषः। आर्द्धधातुकीयाः सामान्येन भवं स्युनव
व स्थितेषु प्रत्ययेषु॰ न चार्द्धधातुकसामान्ये भावे कृते योयतः प्रत्ययः प्राप्नोति स तत्तो ऽभविष्यति॰॥ ॥कृतश्च॰॥ ॥संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृत्रर्थं॰ संयोगादेर्गुणविधाने संयोगोपधग्रहणं कर्त्तव्यं॰ किं प्रयोजनं॰ कृत्रर्थं॰ इहापि यथा स्यात्॰ संच
स्करतुः संचस्करुः। यदि संयोगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन॰ इहापि सस्वरतुः सस्वरुः॰ संयोगोपधस्येत्येव
सिद्धं॰ भवेत्सिद्धं सस्वरतुः सस्वरुः इदं तु न सिध्यति संचस्करतुः संचस्करुरिति॰ किं कारणं सुट्बहिरंगलात्॰ बहिरंगः सुडन्तरंगो
गुणः॰ असिद्धं बहिरंगमन्तरंगे॰ संयोगादिग्रहणे तु क्रियमाणे संयोगोपधग्रहणमनन्यार्थं विज्ञायते॰ ऋतो लिटि गुणात् ञ्णितीति द्विर्वि प्र
तिषेधेन॰ ऋतो लिटि गुणस्यावकाशः सस्वरतुः सस्वरुः ञ्णिदन्वरवकाशः स्वारक
स्याश्रयणान्ना प्राप्ते द्विर्वचने दिग्पारभ्यमाणस्तु बाधते॰॥ कृतश्च॰॥ ॥संयो
गादेरिति॰ इहांगाधिकारादंगं संयोगाद्याश्रीते न च स्कृ इत्येतदंगं संयोगादिर्भवतीति भावः। उपधाग्रहणं संयोगस्य देशविशेषोपलक्षणम् ऽत्याकृस्योपधासंज्ञाविधाना
त्संयोगस्योपधात्वासंभवात्॰ अथवा संयोगावयवे संयोगशब्दो वर्त्तते तत्सोपधात्वमस्त्येव॰ बहिरंगः सुडिति॰ पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण साधनं हि क्रियां निर्वर्त्तय
ति तामुपसर्गो विशिनष्टि॰ न चासिद्धस्य विशेषणेन संबंधो भवति॰ सुट्कात्पूर्वं इत्यत्र तु कृतं पूर्वं धातुरुपसर्गेण युज्यत इत्येवं च सुडंतरंगत्वात्सिद्धो गुण इति नापि उपसंख्यानेन संस्कृषीष्ट

संक्रियन इत्यत्र लिङ्गुणयो

शिव॰ ७९

[illegible]

कार्यमित्यनेनपरस्मिन्२

पुनःप्रसंगविज्ञानाद्वेति॰अस्तुपरविप्रतिषेधेनगुणस्तस्मिन्कृतेवृद्धिर्नविष्यति॰अनाश्रितलक्षणत्वेदंचवृद्धिमात्रमेकलेनाश्रितेनतदुक्तं॰पुनःप्रसंगोनामेति॰
वाचोयुक्तिरेवेयंनसंगच्छते॰लक्षणद्वयस्यपरस्परप्रतिबंधादप्रतिपत्तौप्राप्तायांविप्रतिषेधेपरंकार्यंविहितेनिमित्तसंभवात्पूर्वस्यलक्षणस्यपुनः
प्राप्तिःपुनःप्रसंगउच्यतेनतुपूर्वलक्षणप्राप्तिःपुनःप्रसंगः।तस्मादिति॰ननुयदिनामपुनःप्रसंगवाचोयुक्तिर्नघटतेकिमेतावतागुणःपरत्वयोःकृतयोरुपधा
वृद्धिर्नप्राप्नोतिसत्यांचप्राप्तौकिंपूर्वविप्रतिषेधाश्रयणेनसत्रचिंत्यमेतत्॥ ॥वृद्धिगां॰॥ ॥नगुणेवेत्युच्यतेतिगुणएवपूर्वसूत्रेणनित्यंप्राप्तोविकल्पनीयस्तत्र

नित्यवृद्धिर्भवतिविप्रतिषेधेन॰पुनःप्रसंगविज्ञानाद्वासिद्धं॰अथवापुनःप्रसंगाद्गुणेकृतेरपरत्वेचानउपधायाइतिवृद्धिर्नविष्यति॰नैषदु
कःपरिहारः॰पुनःप्रसंगोनामयत्रतेनैवकृतेप्राप्नोतितेनैवचाकृते॰अत्रखलुगुणेकृतेरपरत्वेचा॰तउपधायाइतिवृद्धिःप्राप्नोतिअकृते
चाचोञ्णितीति॰तस्मात्कृष्ट्यतेकृतोलिटिगुणात्रिणितिवृद्धिःपूर्वविप्रतिषेधेनेति॥ ॥वृद्धि॰॥ ॥किमर्थंह्रस्वोवेत्युच्यतेनगुणोवेत्युच्येत
तत्रायमप्यर्थः॰गुणग्रहणेनकर्तव्यंभवति॰प्रकृतमनुवर्त्ततेकप्रकृतंकृतश्चसंयोगादेर्गुणइति॰ऋतोह्रस्वत्वमित्यप्रतिषेधार्थं॰ऋतोह्र
स्वत्वमुच्यतेइत्वप्रतिषेधार्थं॰इत्वंमाभूदिति॰गुणोवेतीयत्युच्यमानेगुणेनमुक्तेइत्वंप्रसज्येत॰ह्रस्वोवेतिपुनरुच्यमानेह्रस्वेनमुक्तेयथाप्रा
प्तंगुणोभविष्यति॥ ॥केणः॥ ॥केणोह्रस्वत्वेनद्वितयग्रहणंकृन्निवृत्त्यर्थं॰केणोह्रस्वत्वेनद्वितयग्रहणंकर्तव्यं॰किंप्रयोजनं॰कृन्निवृत्त्यर्थं॰कृतिमाभूद्

गुणपक्षेश्शारतुरित्यादिन्नविष्यतितदभावपक्षेतुयणादेशेनविशाश्रतुरित्यादीतिभावः।तत्रायमपीति॰नकेवलंगु शकाधाकाइति॰तत्तर्हिवक्तव्यंनवक्तव्यं॰
णविधानप्रकरणमनुवर्त्ततेनवतियावल्लाघवमपीतिभावः॰इत्वंप्रसज्येतेति॰वार्णदांगंबलीयइतिवर्णाश्रयमंतरंगमपियणंबाधित्वेत्वंस्यात्रह्रस्वविधानेतुय
णादेशः॰सिध्यति॰विशाश्रवान्विदद्वान्निपपवानितिकसौचसिध्यतिगुणविकल्पेत्वेतद्रूपासिद्धिः॥कसोःकित्वेनचप्रतिषेधविषयस्यापिगुणस्यप्रतिषेध
॰उत्तरार्थंचह्रस्वग्रहणंकर्तव्यमितिलाघवमपिनास्तिह्रस्वविधावसुत्तरत्रह्रस्वविधानादेकप्रकर्षान्नबलीतिनास्तिपूर्वोक्तोविशेषः॥ ॥७॥ ॥

[illegible]

[illegible]

भा॰ के॰

८

वार्ति॰

उप॰॥ ॥ओसत इति॰ अँकृत एकादेशे ह्रस्व [redacted]भावाभावयोर्विशेषाभावादंतरंगत्वाच्च प्रागेकादेशे न भाव्यं॰ वार्णादांगमित्येतत्तु समानाश्रयांगविषयं तस्मा
देकादेशे कृते तादिवद्भावे न ह्रस्वप्रसंगस्थ्याघले॰ एकादेशे कृत इति॰ उपसर्गात्परस्योह ते ह्रस्वो विधीयमान एकादेशे कृते भेदाभावाद्भेद निबंधन पौर्वापर्यानुपपत्तेो
नयत आश्रयणेनादिवद्भावाभावाच्च ह्रस्वाभावः॥ आऊहत इति॰ धातूपसर्गयोर संहितानास्ति॰ यदुक्तं संहितैकपदे नित्या नित्या धातूपसर्गयोरित्यादि एवं
च लौकिके प्रयोगे विग्रहाभावान्नित्ये नैकादेशे न भाव्यं॰ एवं च आऊहत इति ये ह्रस्वं पठंति तेन सम्यङ्न्याय विदो लौकिकप्रयोग संपादनाय ह्रस्वो वि
धीयते तस्माल्लौकिके न प्रक्रियावाक्ये नाकृते ह्रस्वे नाङः प्रश्लेष दर्शनमात्रं क्रियते अपत्व लौकिके प्रक्रियावाक्ये ह्रस्वत्व प्रतिपत्तिरुच्यते तथापि नैका चित्स्य

उप॰॥ ॥इह कस्मान्न भवति॰ ओघते उपोघते॰ एकादेशे कृते व्यपवर्गाभावात्॰ एवमपि आऊघते ओघले समोघते इत्यत्र प्राप्नोति अण इ
ति वर्त्तते॰॥ ॥एते र्लिङि॥ ॥एते र्लिङ्युपसर्गात्॰ एते र्लिङ्युपसर्गादिति वक्तव्यं॰ इह मा भूत्॰ ईयात्॰ तत्तर्हि वक्तव्यं न वक्तव्यं॰ उपसर्गादि
ति वर्त्तते॰ एवं तर्ह्याचार्योन्वाचष्टे उपसर्गादित्यनुवर्त्तत इति॰ नैतदन्वाख्येयं अधिकारा अनुवर्त्तंत इति॰ एष एव न्यायो यदुताधिकारा
अनुवर्त्तेरन्॥ ॥रीङृतः॥ ॥दीर्घोच्चारणं किमर्थं॰ न रिङृत इत्येवोच्येत॰ का रूपसिद्धिः॥ मात्रीयति॰ पित्रीयति॰ अकृत्सार्वधातुकयोरिति दी
र्घत्वं भविष्यति॰ एवं तर्हि सिद्धे सति यद्दीर्घोच्चारणं करोति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अंगवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्ये
ति स्वत्रैकादेशस्यादिवद्भावाद्वा ह्रस्व हणे नग्रहणात्समः परस्य ति॰ किमेतस्य ज्ञापने प्रयोजनं॰ पिबेर्गुणप्रतिषेधश्चोदितः स न वक्तव्यो भवति॰॥
ह्रस्वप्रसंगः॥ अण इति वर्त्तत इति॰ एवं च रूपाश्रयोयं विधिरिति ताद्रूप्यानतिदेशाद्दलाभावाद्ध्रस्वत्वाभावः॥ ॥एतेः॥ ॥ईयादिति॰ आशिषि लिङ्यकृत्सार्वधातुक
योरिति दीर्घः॥ नैतदन्वाख्येयमिति॰ वार्त्तिककारेण नैतदन्वाख्येयं सर्वाधिकाराणाम न्वाख्यानप्रसंगात्॰ इति कारास्त्वधिकाराणां प्रवृत्तिनिवृत्ती व्याचक्ष
ते॥ रीङृतः॥ ॥दीर्घत्वं भविष्यतीति॰ ननु नाप्राप्ते दीर्घे रिङारभ्यमाणस्तस्य बाधकः स्यात्॰ नैतदस्ति॰ ऋवर्णस्य बाध्यता रिङस्तु कथं बाध्यते न हि तस्य दीर्घप्राप्ते सभार

[illegible]

शिव॰

८

यङि च॥ ॥यङ्प्रकरण इति॥ हिंसायास्त्वन्यत्र [redacted] जंघन्यत इत्येव भवति॥ अभ्यासरूपं न सिध्यतीति॥ उपधायालोपस्यास्यानिवत्वादिति द्विर्वचनं प्राप्नोति
एवं तर्हीति॥ ईकोधातुग्रहणात् द्विर्वचननिमित्तताभावात्स्थानिवत्त्वाभावात्॥ एवमपीति॥ अजादेशप्रत्यये विधानात्॥ एवं तर्हीति॥ प्रक्रियालाघवाय घकारादे
शविधानात् तर्हि भाव विधावभ्यासाच्चेति कुत्वे गौरव प्रसंगात्॥ व्यक्तिपदार्थाश्रयेण च घीभावे कृते द्विर्वचनं प्रवर्त्तते॥ आकृतिपक्षे तु स्थादेशे नैघीभावे
द्विर्वचनबाध प्रसंगात्॥ ॥नघं॥ ॥जङ्घनीयंत इति॥ जनमिच्छतीति क्यचूलटः शत्रादेशः जस्त्वउगिद्चामिति नुम्॥ छंदसीति॥ आनंतर्यादीत्वस्यैव प्रति

यङि च॥ ॥यङ्प्रकरणे हन्तेर्हिंसायामीट्॥ यङ्प्रकरणे हन्तेर्हिंसायामीङ्वक्तव्यः॥ जेघ्नीयते॥ यदीट् अभ्यासरूपं न सिध्यति॥ एवं तर्हि यङ्प्रकरणे
हन्तेर्हिंसायामीक्॥ एवमप्युपधालोपो न प्राप्नोति॥ एवं तर्हि यङ्प्रकरणे हन्तेर्हिंसायां घी॥ ॥नघंरे॥ ॥अत्यल्पमिदमुच्यते अपुत्रस्ये
ति॥ अपुत्रादीनामिति वक्तव्यं॥ इहापि यथा स्यात्॥ जनीयंतो न्वस्मयवः॥ पुत्रीयंतः सुदानवः॥ छंदसि प्रतिषेधे दीर्घत्वस्य प्रतिषेधः॥ छंदसि प्रति
षेधे दीर्घत्वस्य प्रतिषेधो वक्तव्यः॥ संस्वेद युः मित्रयुः॥ नवाश्वाघस्यात्वचनमवधारणार्थं॥ नवा वक्तव्यं॥ किंकारणं॥ अश्वाघस्यात्वचन
मवधारणार्थं भविष्यति अश्वाघयोरेव छंदसि दीर्घो भवति नान्यस्येति॥ ॥शाछो॥ ॥श्यतेरित्वं व्रते नित्यं॥ श्यतेरित्वं व्रते नित्यमिति वक्त

षेधः प्राप्नोति तत्रश्चापवादे पनीते उत्सर्गो दीर्घः प्राप्नोतीति तस्यापि प्रतिषेधो विधेयः॥ संस्वेद व्यं॥ संशितव्रतः॥ तत्तर्हि वक्तव्यं न वक्तव्यं॥ ॥७॥
युरिति॥ क्यछंदसीत्युप्रत्ययः॥ नवेति॥ अश्वाघयोरनेनैत्वे प्रतिषिद्धे ऽकृत्सार्वधातुकयोरित्याकारे सिद्धे पुनरात्वचनं नियमार्थमित्यन्येषामाकारो न भवति॥ ॥
शाछो॥ ॥श्यतेरिति॥ व्रत इति विषयो निर्दिश्यते न तूत्तरपदं तेन संशिता आलक्षणा इत्यत्रापि नित्यमित्वं भवति॥ यद्येवमित्वे न व्रतस्यद्योतितत्वात्संशित
व्रतस्य प्रयोगो न प्राप्नोति॥ नैष दोषः॥ अन्यत्रापीत्वविधानात्संशितशब्दः सामान्यशब्द इति विशेषप्रतिपादनायाविरुद्धो व्रतशब्दप्रयोगः॥ व्रते तु नित्यमित्वं विधीयते॥
व्रत इति॥ नवक्तव्यमिति॥ साधारणेन न्यायेन सिद्धत्वात् एवं तुल्यधर्माणः शब्दा अनुपन्यस्यति॥

-शाछोरित्स्येनेन-

भा. कै.
८१

विभेतु गर इति २

देवत्रात इति । गुद विदोंदःत इति न त्वं संज्ञायां न भवति । देवग्रहणं संज्ञाविषयोपलक्षणार्थं तेन भवत्रात इत्यत्रापि संज्ञात्वा ल्लताभावो यद्यनुक्रियाशब्दः त्राणं त्रातमिति त
दा न त्व विकल्पः । गल इति । अवि विभाषेति लत्वं प्राप्नुयोगे नि संभवति लताभावः क्रियाशब्दे न भयं भवति गलो गर इति । ग्राह इति । विभाषा ग्रह इति ग्रह ज्योतिः ल चरे नित्यं भवति ज्यो
तिषि पचाद्यच् भवग्रह इति । इति योग इति । लक्षणहेतोः क्रियाया इति शतृशानचोर्विधिः हंती निपत्यायते वर्षती तिष्ठतीति धावतीत्यादि प्रयोगे न भवति । मिथ इति । एकस्मि
न्विषये न विकल्प्यन्ते किं तु विषयभेदेन । एतच्चाकृतिपक्ष उपपद्यते तत्र हि सर्वं लक्ष्यमेकध्यमापाद्य उभयमुपदिश्यते न तत्र यौगपद्यं भवतीति तावता नैव लक्षणस्य व्यापा
रः । असंकीर्णत्वं तु प्रयोगवशात्प्रतीयते । गवाक्ष इति । वातायने । वङ्क्स्फोटायनस्येति नित्यमवङ्भवति प्राप्ते गेगोरतिगोक्षीति भवत्यन्यत्र तु विकल्पेन । एतच्चो

देवत्रातो गलो ग्राह इतियोगे च सद्विधिः । मिथस्ते न विभाष्यन्ते गवाक्षः संशितव्रतः ॥ ॥ दो द्धोः ॥ ॥ अवदत्तं विदत्तं च प्रदत्तं चादिक
र्मणि । सुदत्तमनुदत्तं च निदत्तमिति चेष्यते । किं पुनरयं तकारान्त आहोस्विद्दकारान्तः उत धकारान्तः अथवा थकारान्तः । कश्चात्र विशेषः
तान्ते दोषो दीर्घत्वं स्यात् । यदि तान्तः हस्तीति दीर्घत्वं प्राप्नोति । दान्ते दोषो निष्ठानत्वं । अथ दकारान्तः रदाभ्यां निष्ठात इति नत्वं प्राप्नोति । धान्ते धत्व
प्राप्तिः । अथ धान्तः झषस्तथोर्धो ऽध इति धत्वं प्राप्नोति । थान्ते ऽदोषस्तस्मात्थान्तः । अथ थकारान्तः न दोषो भवति ॥

दाहरणमात्रं न तु व्यवस्थितविभाषाणां परिगणनं अन्यासामपि संभवात् ॥ ॥ दो द्धोः ॥ ॥ अवदत्तमिति । आदिकर्मग्रहणं प्रदत्तशब्दस्यैव संभवाद्विशेषण
मवदत्तादिसिध्यर्थत्वाद्वचनस्यावदत्तादयोपि भवन्ति तथा चाच उपसर्गात्त इत्यत्र च तकार इत्यस्यावकाशः प्रत्तमवत्तमिति वक्ष्यते तस्मान्निदत्तमिति चे शिवः
ष्यते इति च शब्देनावदत्तादयोपीष्यन्त इति सूच्यते । किं पुनरिति । यद्यपि दकारः श्रूयते तथापि संहितायां तकारादीनामप्येत स्वरूपस्य संभवात्प्रश्नः । तान्ते दोष इति । ८१
यदा इत्येतस्य थकारान्त आदेशस्तत्र दीर्घ इति सूत्रार्थस्तदायं दोषो यदा तु तकारादेर्दादेशे दीर्घस्तदा न दोषः । तस्मात्थान्त इति । सन्निपातपरिभाषाश्र
येतु दान्तधान्तयोर्न दोषः ॥ ॥७॥

=अवउपसर्गात्तमिति तलेभाषेण तत्त्रिविधत्वार्थमेवं दत्तं लच उपसर्गात्तकार विहस्यर्थमिति भावः ।३=

अचउप॰ ॥ ॥यदीति॰ दाशब्दाकारस्य इआवेदनमि[illegible]तिसंयोगा दिग्रूपेन॰ नासौ सूत्रभेद इति॰ दोषायेतिशेषः॥ तदेव सूत्रं लघु क्रियमाणं प्रत्युत गुरुतां संपादयति अथवेति॰ लघुकरणे पियदिन्यासांतरलात्स्य एवं सूत्रभेद इति मतं तदेवमुत्तरं अलोंत्यस्य दाव पवादौ आदेः परस्यानेकाल् शित्सर्वस्येति त योर्विप्रतिषेधे परं प्रवर्त्तते अचइतिवर्त्ततइति॰ तेनापवर्द्धस्य योन्नस्मात्परस्य पकारस्यादिनकार आदेशः॥ तैश्चां तास्य मलांत्र शोंत इति शेलं पूर्वस्य मलांत्र रूशीति॰ लवाम्यामिति॰ लक्ष्य कृदोरविलप्र॰ अस्यापि नकारादौ तकारः प्राप्नोति अग्रहणानुवृत्तौ चापूरुद्धस्य योन्नस्मात्परो नकारादौ नकश्चिदस्तीति

अचउप॰ ॥ ॥अचउपसर्गात्तत आकारस्य ग्रहणं॰ अचउपसर्गात्तत आकारग्रहणं कर्त्तव्यं॰ अलोंत्यस्य विधयो भवंतीत्यं तास्य भविष्यति॰ न सिध्यति॰ किं कारणं॰ आदेर्हि परस्य॰ अत्र हि तस्मादित्युत्तरस्यादेः परस्येति दकारस्य प्राप्नोति॰ नैष दोषः॥ अवर्णं प्रकरणात्सिद्धं॰ अस्येति वर्त्तते॰ क्व प्रकृतं॰ अस्यच्वाविति॰ यथवर्णमनुवर्त्तते॰ दआवे दोषो भवति॰ एवं तर्हि एवं वक्ष्यामि दो[illegible] द्यो रितिदोय आकारस्तस्या भवति॰ तत अचउपसर्गात्तः अस्येत्येव॰ एवमपि सूत्रभेदः कृतो भवति॰ नैष सूत्रभेदः॥ सूत्रभेदं तमुपाचरंति यत्र तदेवान्यक्तत्रं क्रियते॰ अयोवा यद्धितदेवोपसंहृत्य क्रियते॰ नासौ सूत्रभेदः॥ अथवा द्वितकारको निर्देशः क्रियते सोऽनेकाल् शित्सर्वस्येति सर्वस्य भविष्यति॰ इहापि तर्हि प्राप्नोति॰ अजिरन्मइति॰ अच इति वर्त्तते॰ तच्चावश्यमग्रहणमनुवर्त्त्यं लवाम्यामित्येवमर्थं॰ अथवा त्रितकारको निर्देशः करिष्यते इत्यर्थौ द्यावुत्तरार्थश्चैकः॥ घतेरिता दचस्तः॰ घतेरितादचस्तइत्येतद्भवति विप्रतिषेधेन॰ घतेरित्यस्यावकाशः॥ निर्द्दितः॥ निर्द्दितवान्॰ अचस्तइत्यस्यावकाशः॥ प्रत्तम॰ वत्तं॰ इहोभयं प्राप्नोति नीत्तं वीत्तं

ततोभावः॥ अथवेति॰ नकारद्वयात्मक आदेशः॰ पृथग्विभक्तिकरणापेक्षया सकारस्तकारस्तस्य भावः॥ स्वरितत्वप्रतिज्ञानादुत्तरत्रानुवृत्तिः॥ लवाम्यामित्यादौ तु तत्वं न[illegible] ति॰ पकारलोपादेश[illegible]भावात्तन्न चन्नत पूर्वगसाम्प्रयोन्याय्यः॥ अजिरित्यादौ सांप्रतिकाभावे संभवे गौणस्याग्रहणात्॰ अत एव सम कष्टता भावात्तत्रयाप्रत्यये ॰ प्रत्यये संप्रसयइतिनावतिष्ठते॰ अजिः संस्तृतमितिलिंगात्॰ अनभिप्रलयस्यैव ग्रहणे जिरितिनिर्द्देशोपपत्तिः॥ घतेरितादिति॰ पुरस्तादपवादन्यायादित्वं दआवस्ये

अपो०॥ ॥माङ्घिरिति॰पद्व्लोमा॰सितिमासरशह्रसमासादेशस्यछंदस्येवविधानान्मासश्छंदसीतिछंदोग्रहणंनकर्त्तव्यंनक्रियतेभाषायामपिक्वचित्सदादपःश्रुतुं
लइतिज्ञापनायेसाकुः॥ ॥आपू॰॥ ॥ऊपेरितिइग्रहणमनुवर्त्ततेतेनऊपौविशेष्यमाणेऽजंतस्यऊपेरीतंविधीयमानमलोंतस्येपतंतस्यप्राप्नोतीतिभावः॥लोपोंत
स्येति॰ऊपिनाज्विशेष्यतेयथाबाधिष्यामेवंचैकप्रस्यानेविशेषणेविशेष्यभावोभवतीतितत्रान्तस्याचःसावकाशमित्वंपूर्वविप्रतिषेधेनणिलोपोबाधते॰इतर

अपोभि॰॥ ॥अपोभिमासश्छंदसि॰अपोभीसत्रमासश्छंदसीलुपसंख्यानंकर्त्तव्यं॰माङ्घिरिष्याइंद्रोवृत्रहा॰अतस्त्यमिदमुच्यते॰स्ववस्स्व
तवसोर्मासउषश्रूतइष्यते॰स्ववद्भिःस्वतवद्भिःमाङ्घिरिंद्रोवृत्रहासमुषद्भिरजायथा॥ ॥सनिमी॰॥ ॥इस्त्वंसनिराधोर्हिंसायां॰इस्त्वंसनि
राधोर्हिंसायामितिवक्तव्यं॰प्रतिरित्सति॰हिंसायामितिकिमर्थं॰आरिप्सति॰॥ ॥आपज्ञपू॰॥ ॥ऊपेरीत्वमनंतस्य॰ऊपेरीत्वमनंतस्येतिव
क्तव्यं॰ज्ञीप्सति॰तत्तर्हिवक्तव्यंनवक्तव्यं॰लोपोंतस्यबाधकोभविष्यति॰अनवकाशाविधयोबाधकाभवंतिसावकाशश्चणिलोपः॥कोवका
शः॥कारणकारणा॰एवमपीत्वमंतस्यलोपस्यबाधकंस्यात्॰अनवकाशाविधयोबाधकाभवंतिइत्वमपिसावकाशं॰कोवकाशः॥अनं
कथंपुनःसत्यंतेनंतस्येतंस्यात्॰योऽचांगंविशेषयेतस्यानंतस्यनस्यात्स्वयंतुखल्वंगेनाचंविशेषयिष्यामः॥अंगस्याचोयत्रतत्र
स्यस्येति॰एवमप्युभयोःसावकाशयोःपरत्वादीत्वंप्राप्नोतितस्मादनंतस्येतिवक्तव्यं॥ ॥अत्रलोपो॰॥ ॥अभ्यासस्यानचि॰अभ्यासस्ये
त्यनुग्रहीतानिप्रायआह॰अनवकाशाइति॰ईत्वमेवतनवकाशत्वाद्बाधकंप्राप्नो तियदुच्यतेतदनचिद्रष्टव्यं॰पतापतःचराचरःवदावदः॥ ॥
८२ ति॰एवंपीति॰नन्वस्तुपरत्वादीत्वंतस्यस्यानिवर्त्तावाभिलोपोभविष्यतिईत्ववचनंत्वंतस्यश्रवणार्थंस्यात्॰नैतदस्ति॰सरूपनोविप्रतिषेधइतिणिलोपा[redacted]
प्रसंगात्॥ ॥अत्र॰॥ ॥चराचरइति॰चरिचलिपतिवदीनांद्विर्वचनमच्याक्काभ्यासस्येतिद्विर्वचनमागागमश्चेतिहलादिशेषोत्रनभवति॰नन्वागमविधानसाम
र्थ्याद्धलादिशेषोनभविष्यति॰नहिहलादिशेषेआगमस्यादेशस्यवाविशेषोस्तीत्यादेशएवाकारोविधेयःस्यात्॰नैतदस्ति॰ससपिहलादिशेषेविग्रहीतश्रवणार्थमाग्विधा

शिवः
८२

=अंलसेसर्वः॥३९=

=आयंचवदेकोस्मिन्निसनेनः। ४॥ प्राग्नुक्त एवेति प्राग्नुक्तोदाहरणन्यायेनोक्त एवेत्यर्थः॥४॥

हला॥ ॥हलामादिरिति॥ विग्रहदर्शनं च स्यष्टम्‌निपात्यर्थं॥ अजादिष्विति॥ अजादिषु अभ्यासेषु हलं तत्सापेक्षत्वादित्येहल आश्रीयमाणे शेषः प्राप्नोति॥ अस्त्वभ्यासे संघाते चेत्स्याक्षि
ह॥ अन्त्ये ककारस्य शेषः प्राप्नोति कर्मधारये त्वभ्यासापेक्षमादित्वं हलो विज्ञायते इति शेषोन भव ति॥ आदिशेषनिमित्तत्वादिति॥ शेषग्रहणेन्यनिवृत्तिर्युक्तमवस्थानमादेरिति यत्रै
वाभ्यासे प्रयोगे चेत्‌ नादेरादेर्हलोवस्थानं तत्रैवान्यस्य निवृत्तिः स्यान्नान्यत्रावस्थानं हि शब्दार्थतान्प्रधानं न च प्रधानाभावे आनुषंगिककार्यप्रवृत्तिरतन्नक्षेत्सत्राषिककार
षकारयोरस्याभवृत्याद्यानिवृत्तप्रसंगः॥ षष्ठीसमासे त्वादेरस्ति संचटकारस्यादित्वाभावेन शेषप्रसंगः स च प्राग्नुक्त एव तत्र यथाकृतिपक्षआश्रीयतेन दाभ्यासादस्तौ

हलादिः शेषः॥ ॥किमयं षष्ठीसमासः हलामादिर्हलादिर्हलादिः शिष्यत इति॥ आहोस्वित्कर्मधारयः हल्‌ आदिर्हलादिर्हलादिः शिष्यत इति॥ कश्चात्र वि
शेषः॥ हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषप्रसंगः॥ हलादिशेषे षष्ठीसमास इति चेदजादिषु शेषः प्राप्नोति॥ आनक्ष आनक्षतुः आनक्षुः।
अस्तु तर्हि कर्मधारयः॥ कर्मधारय इति सादिशेषनिमित्तत्वाल्लोपस्य तदभावे लोपवचनं॥ कर्मधारय इति चेदादिशेषनिमित्तत्वाल्लोपस्य त
दभावे आद्यस्य हलोभावे लोपो वक्तव्यः॥ आटतुः आटुः॥ तस्मादनादिर्लोपः॥ तस्मादनादिर्हल्‌ लुप्यत इति वक्तव्यं॥ उक्तं वा॥ किमुक्तं॥ प्रतिविधा
स्यते हलादिशेषवहतिसइदानीं प्रतिविधानकालः॥ इदं प्रतिविधीयते॥ इदं प्रकृतमनन्तरलोपोभ्यासस्येति॥ ततो [redacted] वक्ष्यामि ह्रस्वः ह्रस्वोभ
वसादेशः॥ अभ्यासस्य लोप इत्यनुवर्त्तते तत्र ह्रस्वभाविनां ह्रस्वो लोपभाविनां लोपः भविष्यति॥ ततो हलादिशेषश्चेति॥ अथवैवं वक्ष्यामि ह्र
स्वः [redacted] ह्रस्वो भवत्यभ्यासस्येति॥ ततो हल्‌
वर्त्तमानो हलादिः सर्वस्याभ्यासव्यक्तावनादेर्निवृत्तिं करोतीति दोषाभावो व्यक्तिपक्षे तु यस्यामेवाभ्यासव्यक्तौ हल्‌ आदे
रवस्थानं तत्रैवानादेर्निवृत्तिर्नान्यत्रेति दोषप्रसंगः॥ ह्रस्वभाविनामिति॥ ह्रस्वस्तु साध्यरिजालोपस्यानादजंतस्याभ्यासस्य ह्रस्वो विधीयमानो लोपस्येति वचनाद
च एव दीर्घस्य [redacted] ह्रस्वस्य च लोपबाधनार्थो विज्ञायत इति हल्विषय एवादिशेष [redacted] निरपेक्षो लोपोवतिष्ठते॥ तत आदेरपि हलो लोपप्रसंगे तद्बाधनार्थं ह
लादिशेषइति सूत्रमेतदेवज्ञापकं लोपविधावलोंत्यपरिभाषा नोपतिष्ठत इति आनक्षे साधयनं यस्यापि हलो लोपो भवतीन कश्चिद्दोषः॥ ॥७॥ ॥७॥

प्राप्ते॰

अहल्त्वेति॰ अविद्यमानहल्कोऽभ्यासो न वृत्तीर्थः॥ ॥शर्पूर्वाः॥ ॥उच्चिच्छिषतीति॰ उच्छी विवासे छे चे संतरंगत्वान्तुक् सन इड्पूर्वत्रासिद्धमिति तुकस्यासिद्धत्वात्तच्छिशब्दे
द्विरुच्यते नकारस्य शेषे छस्य शेषार्थं वार्त्तिकं ननु च पूर्वत्रासिद्धीयमद्विर्वचन इति तुके कृते । च्छिशब्दस्य द्विर्वचने चकारशेषे णैव रूपं सिध्यति न चेदमस्ति निमि
त्ताभावे नैमित्तिकस्याभाव इति येन तुकं निवर्त्तेत॰ एवं तर्हि पूर्वत्रासिद्धमद्विर्वचन इत्येतदनित्यमुभौ साभ्यासस्येति वचनादन्यथा कृतत्वेन तस्य द्विर्वचने
प्राणिणदिसादि सिध्यतीति किं स्वचेण॰ तथा चोज्झदिस सिद्धस्योदाहरणं प्रदर्श्यिष्यते॰ इतरेतराश्रयत्वे स्थितस्य समुदायस्य प्रविभज्यान्वाख्याने नरंगत्वं तु

अहल्त्वमनवसभ्यासः॥ तत आदिशेषः॥ आदिःशेषश्चानवसभ्यासस्येति॰ अथवा योगविभागः करिष्यते॰ ह्रस्वः॥ ह्रस्वादेशोऽनवसभ्यासस्य ततो हल्
हल्त्वं लुप्यतेऽभ्यासस्य ततः आदिशेषः॥ आदिशेषश्चानवसभ्यासस्य॥ ॥शर्पूः॥ ॥शर्पूर्वशेषे खयं पूर्वग्रहणं कर्त्तव्यं॰ खर्पूर्वाः खयः शिष्यन्ते
खरो लुप्यन्त इति वक्तव्यं॰ किं प्रयोजनं॰ उच्चिच्छिषतीति तुकः श्रवणं मा भूदिति॰ तत्तर्हि वक्तव्यं॰ न वक्तव्यं॰ चर्त्वे कृते तु श्रवणं भविष्यतीति॰ असिद्धं चर्त्वं तस्या
सिद्धत्वात्तुक् प्राप्नोति॰ सिद्धकाण्डे पठितमभ्यासजश्त्वचर्त्वमेतत्तु कोरिति॰ एवमप्यन्तरंगत्वात्प्राप्नोति तस्मात्खर्पूर्वग्रहणं कर्त्तव्यं न कर्त्तव्यं॰ एतत्तु
ग्रहणं न करिष्यते अभ्यासजश्त्वचर्त्वं सिद्धमित्येव॰ आदिशेषप्रसंगस्तु॰ आदिशेषस्तु प्राप्नोतीति चेत् स्यादेतत्॰ ननु चानादिशेषेणादिशेषं बाधिष्य
ते कथमन्यस्योच्यमानमन्यस्य बाधकं स्यादुच्यते यदि खल्वपि संभवे बाधनं भवति अस्ति च संभवो यदुभयं स्यात्॰ यथादिशेषोपि भवति शर्पूर्ववचन
मिदानीं किमर्थं स्यात्॰

कोऽनपेक्ष्याकृत एव तु किं द्विर्वचनं म[redacted]ताह॰ चर्त्वे कृत इति॰ अभ्यासे चर्चेति॰ चर्त्वे छस्य कृते तु गमावाद्रूपं सिध्यति॰ असिद्धमिति॰ तु किं कर्त्तव्ये॰
एवमप्यन्तरंगहादिति॰ शब्दनिलले प्युपायानामवश्याश्रयणीयोऽन्तरंगबहिरंगभावः॥ एतत्तु ग्रहणमिति॰ नदकरणे हलादिशेषेपि कर्त्तव्ये चुत्वलक्षणस्य चर्त्वस्या
सिद्धत्वान्नकारस्य चकारे कृते हलादिशेषेण निवर्त्तिते छकारे रूपं सिध्यति॰ आदिशेषप्रसंगस्त्विति॰ विषयभेदाद्विरोधाभावाच्च बाध्यबाधकभावायोगः॥ शर्पूर्वव
चनमिति॰ अपवादाभावात्पूर्वं यं साधयन्ति अपवादं च विदधत्युत्सर्गं च निवर्त्तयन्ति तत्रोत्सर्गाभ्युपगमे एकार्थत्वे द्वितीयार्थस्य लाभादानर्थक्यप्रसंगः एवेत्यर्थः॥ हलो

भावा॰ =नित्यादिति भावः॥४=

=मतुवंतं॰ विशिष्टार्थस्य लाभादित्यर्थः॥१= खयां लोपप्रतिषेधार्थमित्ये नेनाम्याप वादत्वमेव सिद्धत्वं नास्ति उत्तरवादिन आशयमाह हलो॰ इति॰ १=

व्यपकर्षविज्ञानादिति· व्यपकर्षणमुत्सर्गस्य निवर्त्तनं तस्य विज्ञानं तस्मादपवादविधानादित्यर्थः· एकाभ्यासविषयत्वादविशेषेप्युत्सर्गापवादभावः॥ ॥दाधर्त्ति॥ श्वाविति· ब
हुलंछंदसीति श्यपः श्लुः· तुजादीनामिति· तुजादीनां दीर्घोभ्यासस्येति दीर्घत्वमित्यर्थः। पर्णश्रुषिवदिति· यथा पर्णं निशोषयंति पर्णश्रुषोशानाइत्यादौ किपि बहुलमन्यत्रा

शपूर्ववचनं किमर्थमितिचेत्तयांलोपप्रतिषेधार्थं· शपूर्ववचनं किमर्थमितिचेत्तयांलोपोमाभूदिति· व्यपकर्षविज्ञानात्सिद्धं· व्यपकर्षविज्ञानात्सि
द्धमेतत्· किमिदं व्यपकर्षविज्ञानादिति· अपवादविज्ञानात्· अपवादत्वात्त्वानादिशेष आदिशेषं बाधिष्यते [redacted] ननुचोक्तं कथमन्यस्योच्यमान
मन्यस्यबाधकंस्यादिति इदंतावदयंप्रष्टव्यः यदितन्नोच्येत किमिहस्यात्· हलादिशेषः। हलादिशेषश्चेन्नाभ्यासे हलादिशेषइत्युच्यतेतद्बा
धकं भविष्यति· यदप्युच्यते असतिस्वल्वपिसंभवेबाधनं· अस्तिच संभवोयदुभयंस्यादिति· सत्यपिसंभवेबाधनंभवतितद्यथा दधिब्राह्म
णेभ्योदीयतां तक्रंकौण्डिन्यायेति सत्यपिसंभवे दधिदानस्य तक्रदानंबाधकंभवति· एवमिहापि सत्यपिसंभवे अनादिशेष [redacted] आदि
शेषंबाधिष्यते॥ ॥दाधर्त्ति॥ ॥दाधर्त्तीति किंनिपात्यते· धारयतेः श्लाव भ्यासस्यदीर्घत्वं णिलुक्· अनिपातने तुजादीनां दभ्यासदीर्घत्वप
र्णश्रुषिवत्सिलुग्भविष्यति· यङो वा श्लावभ्यासदीर्घत्वंपरस्मैपदंच· अनिपातने तुजानवदभ्यासस्यदीर्घत्वं युध्यतिवत्परस्मैपदंचभविष्यति· दर्द
र्षीति किंनिपात्यते· धारयतेः श्लावभ्यासस्यरुक् णिलुक्· अनिपातने वा अदुरुवदुरुपर्णश्रुषिवत्सिलुग्भविष्यति· यङोवाभ्यासरुक्परस्मैप
दंच· अनिपातने वा अदुरुवद्दुर्युध्यतिवत्परस्मैपदंचभविष्यति· बोभूतुरिति किंनिपात्यते· भवतेर्यङ्लुगंतस्यागुणत्वंनिपात्यते· नैतदस्तिप्र
योजनं· सिद्धमत्रागुणत्वं भूसुवोस्तिङीति· एवंतर्हिनियमार्थं भविष्यति अत्रैवयङ्लुगंतस्यगुणोनभवतिनान्यत्र क्वमाभूत्· बोभवतीति· तेतिक्तेइ
तिकिंनिपात्यते तिजेर्यङ्लुगंतस्यात्मनेपदंनिपात्यते· नैतदस्तिप्रयोजनं॥
पिसंज्ञाछंदसोरितिणिलुक्भवत्येवंदाधर्त्तीत्यादौनविष्यतीत्यर्थः। यङइति· यङ
अवस्थानइत्यस्यार्थोभायेव्यस्येमनशपुः युध्यतिवदिति· व्यत्ययोबहुलमित्यनेनेत्यर्थः। कृडितिः शीङोरुड्बहुलंछंदसीत्यनेन· बोभवतीति· लिङर्थेलेडितेदोडाटाविलइ॥

=तस्य बहुलंछंदसीतिश्लुः।१ =अनत्ययगुणाभावः शपलोपचरण्याभावः।२=

—प्रत्ययलक्षणसूत्रविध्यर्थमितिमतं नियमार्थमितिपक्षे ... निरिति ...

मा॰ कै॰ ८५

पस्य ङितः ...

सिद्धमचेति॰ प्रत्ययलक्षणेन॰ यद्यप्यनुदात्तङित इति ङित्वनिमित्तमात्मनेपदं न प्रत्ययनिमित्तं तथापि लोल्लुयत इत्यादौ यङ् तादात्मनेपदं तत्प्रत्ययलक्षणेन भवत्येव॰ एतन्नियमार्थमिति॰ एवं चाशादिषु चर्करीतं परस्मैपदमिति लिंगं॥ सिद्धानुवादः परस्मैपदग्रहणं कर्त्तर्येव चेदात्मनेपदं नियम्यत इति भावकर्मणोर्यङ्लुगन्तादात्मनेपदं भवत्येव॥ ॥घुति॥ ॥किमर्थमिति॰ स्वपिरेव सोत्र तान्निर्देशस्य दीर्घकृतान्निर्दिष्ट इति पूर्वः पक्षः॥ तत्र लिटि कितिव चिस्वपीति संप्रसारणविधानात्कृतसंप्रसारणस्य द्विर्वचने सत्यभ्यासस्य संप्रसारणं श्रूयते॰ कितिलि घभ्यासस्येति संप्रसारणं सनोरुद विदेकित्वविधानाद्वचिस्वपीति संप्रसारणं स्वपिसि

सिद्धमचात्मनेपदं॰ अनुदात्तङित आत्मनेपदमिति॰ एतन्नियमार्थं भविष्यति॰ अत्रैव यङ्लुगन्तस्यात्मनेपदं न भवति नान्यत्रेति॰ क्वान्यत्रेमात्रं॰ बेभिदीति चेच्छिदीति॥ ॥घुतिस्वा॥ ॥किमर्थं स्वापेरभ्यासस्य संप्रसारणमुच्यते यदा सर्वेषभ्यासस्यानेघुस्वपेः संप्रसारणमुक्तं स्वापिग्रहणं व्यपेतार्थं॰ व्यपेतार्थोयमारंभः॥ सुष्वापयिषतीति॰ अस्तिप्रयोजनमेतत्॰ किं तर्हीति॰ तत्र रुदं ते॰ तिप्रसंगः॥ तत्र रुदंते॰ तिप्रसंगो भवति॰ इहापि प्राप्नोति॰ स्वापकमिच्छति स्वापकीयति स्वापकीयतेः सन् सिषापकीयिषति॰ सिद्धं तु णिज्ग्रहणात्॰ सिद्धमेतत्॰ कथं॰ णिज्ग्रहणं कर्त्तव्यं॰ न कर्त्तव्यं॰ निर्देशादेव हि व्यक्तं ण्यंतस्य ग्रहणमिति॰ तन्निर्देशः प्रमाणं शक्यः कर्त्तुं यथा हि निर्देशस्तपेरापि प्रसज्येत स्वापं करोति स्वापयति॰ स्वापयतेः सन्॰ सिषापयिषतीति तस्मात्सिग्रहणं कर्त्तव्यं॥ ॥निजां॥ ॥त्रिग्रहणं नर्थकं गणान्तत्वात्॰ त्रिग्रहणमनर्थकं किं कारणं गणान्तत्वात्॰ त्रय एव निजादयः॥

समिध्येत्रांय ङिचङि स्वापेश्चङीति॰ व्यपेतार्थमिति॰ स्वपेः सनादिषु परतो विहितं संप्रसारणं णिचाव्यवधानेन प्राप्नोतीति स्वापेर्ण्यंतस्याभ्यासस्य संप्रसारणं विधीयते॰ सुष्वापयिषतीति॰ स्वापयितुमिच्छतीति सन् इकुणयादेशः॥ णौ कृतस्य स्थानिवत्वात्स्वपेर्ण्यंतस्य द्विर्वचनमभ्यासस्य संप्रसारणं स्यो तिरुयोरितिषत्वं॰ इतरथा तु ण्यंतस्य ग्रहणमबुध्वा येन केन चित्प्रसपेन व्यवहितस्य स्वपेरभ्यासस्य संप्रसारणमनेनोक्तमिति मत्वाह॰ अस्तिप्रयोजनमिति॰ स्वपितीति स्वापकस्तमिच्छतीति क्यच्॰ निर्देशादेवेति॰ ण्यंत एव स्वपिः सूत्रे निर्दिष्ट इति भावः॥ स्वापं करोतीति स्वपेर्घञंतात्तत्करोतीति णिच्॰ तस्मात्सिग्रहणमिति॰ स्वपेर्णेरिति वक्तव्यं तेन स्वपेर्यो णिर्विधीयते तदंतस्य ग्रहणाद्घञंतात्सिग्रहणं भावः॥ ॥निजां॥ ॥त्रिग्रहणमिति॰ वृत्करणपरिच्छिन्नास्त्रय एव निजादय इत्यर्थः॥ ॥

शिवः ८५

—अस्यप्राप्तिमात्रेणोक्तेः ... किंचित्प्रयोजनमस्ति॥ ४॥

एकारे विधातव्ये गुणग्रहणमिकः परिभाषोपस्थानार्थं तेन हलादिशेषे कृते गुणो भवत्यन्यथा तदपवादो हलः स्थाने एकारः स्यात् अभ्यासविकारेऽपवादो नोत्सर्गान्बाध
नइत्यस्याश्रीयतेतदाविस्पष्टार्थं गुणग्रहणं॥ ॥अर्त्तिः॥ ॥ऋच्छगनाविति जुहोत्यादौ पठ्यते गत्यस्तुतीच छंदसीति छंदोग्रहणं पूर्वेषामपि छंदस्येवेती नांशेषइति छंदस एवार्त्ति
श्लु विषयः इयर्त्तीति तिप् शप् श्लुः द्विर्वचनमुरदित्यत्वमित्वमभ्यासस्यासवर्णइतीयङ् गुणः रपरत्वं॥ ॥गुणो॥ ॥ऐचोरिति ह्रस्वस्यानवकाशः पपाविति पादि

उत्तरार्थं तु [redacted] उत्तरार्थं तर्हि त्रिग्रहणं कर्त्तव्यं मज्जामित् न्ययाणं यथास्यादिहमाभूत् जहातिः॥ ॥अर्त्तिः॥ ॥अर्त्तिग्रहणं किमर्थं न वा फलं
छंदसीयेव सिद्धं न त्वं तरेणछंदो र्त्तेः श्लुर्लभ्यः एवं तर्हि सिद्धे सतियदर्त्तिग्रहणं करोति तज्ज्ञापयत्यन्यत्रापि भाषायामर्त्तेः श्लुर्भवतीति किमेत
ज्ज्ञापने प्रयोजनं इयर्त्तीत्येतत् सिद्धं भवति॥ ॥गुणोयङ्॥ ॥ऐचोर्यङि दीर्घप्रसंगे ऐचोर्यङि दीर्घत्वं प्राप्नोति शेशीयते शौशूयते ननु च ह्रस्व
ते कृते गुणो भविष्यति दीर्घत्वं न भविष्यति न सिध्यति किं कारणं ह्रस्वादिपरं दीर्घत्वं ह्रस्वत्वं क्रियतां दीर्घत्वमितिपरत्वाद्दीर्घत्वेन भवितव्यं नवा
भ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् नवा एष दोषः किं कारणं अभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वात् अभ्यासविकारे
ष्वपवादा उत्सर्गान्न बाधंते इत्येषा परिभाषा कर्त्तव्या कान्येतस्याः परिभाषायाः प्रयोजनानि प्रयोजनं सन्वद्भावस्य दीर्घत्वं अचीकरत्
अजीहरत् सन्वद्भावमपवादत्वाद्दीर्घत्वं न बाधते मान्मथतीनामित्वस्य मान्मथतीनां दीर्घत्वमपवादत्वादित्वं न बाधते गणेरीत्वं हलादिशे
षस्य गणेरीत्वमपवादत्वाद्धलादिशेषं न बाधते इदमयुक्तं वर्त्तते किमत्रायुक्तं ऐचोर्यङि दीर्घत्वप्रसंगे ह्रस्वादिपरं दीर्घत्वमित्युक्त्वा न तदुच्य
तेनवाभ्यासविकारेष्वपवादस्योत्सर्गाबाधकत्वादिति तस्याश्च परिभाषायाः प्रयोजनानि नाभोच्यंते प्रयोजनं सन्वद्भावस्य दीर्घत्वं मान्मथतीनां
दीर्घत्वमित्वस्य गणेरीत्वं हलादिशेषस्येति॥

दीर्घो कितइत्यस्यानवकाशः कृते कृते वा ह्रस्वत्वे पापच्यतइति शेठौ काशतइत्यादौ तु परत्वादोकारस्य दीर्घ औकार एव प्राप्नो
ति ऐकारस्योदाहरणं [redacted] पेपीयते इति ह्रस्वत्वे कृते इति वक्ष्यमाणेभिप्रायः गुणश्च दीर्घस्यापवाद इति दीर्घाभावः इदमयुक्तमिति परत्वाद्दीर्घप्रसंगमुक्त्वोत्सर्गा
पवादयोर्बाध्यबाधकताभावः प्रतिपाद्यतइत्यस्युक्तं प्रयोजनमपि किंचिन्न वचनानुरूपमिति पौर्वापर्यविरोधादयुक्तमित्यर्थः॥ ॥७॥ ॥७॥

=प्रयोजनानिति उत्सर्गापवादयोर्लक्षणयोः उत्सर्गापवादभावेनाप्राप्तत्वात्॥१ =पेप्रगत्वादिति भावः॥२=एणेस्तुसंसेव्यते॥३= नतु कृतेपि ह्रस्वत्वे दीर्घः स्यात् परत्वान्नगुणः इस्तनआह गुणश्चेति॥२= =ननश्चेगंनत्वाभावाद्गुणस्याप्राप्तिः॥३= पूर्वापरविरोधात्॥१=
अतएवोत्सर्गस्य बाधितत्वाद्ध्यानासंबलमिति नामधेयकः॥२=

=नास्तीति॰ विषयभेदादिति भावः॥१२= विषयभेदेप्यनवकाशत्वमात्रं बाधनिमित्तमस्तीत्याह नेति॰ ४८ अत्र सन्यतइत्यादिना कार्यस्य कस्याप्य विधानात्सन्वत्वाप्राप्तिः॥१९= उत्सर्गे कृतेन च दिताप्यस्यैवापवादत्वं गणेरीत्वं तु बाध्याभ्यासलोपे कृते प्राप्नोत्यभ्यासस्यैकवाक्यतया वाक्यार्थेन णकारस्यैव प्राप्तेः एवं चान आलाबाधः

नच सन्वद्भावमिति॰ सन्वद्भावस्यावकाशो, विभ्राणदिति दीर्घस्यावकाशो, दीदिपदिति इहोभयं प्राप्नोति अचीकरदिति न च परत्वाद्दीर्घः प्राप्नोति॰ न खल्वपीति॰ सन्वल्लयोभ्यासदीर्घत्वं च सन्नियोगेन विधीयते इत्यंतरंगं दीर्घत्वम् इत्त्वं तु बहिरंगं सन्निपरतोंगाधिकारे भ्यासस्याकारांतस्य विधानात् न खल्वपीति॰ आदेः शेषो विधीयते सस्य वीत्वमितिनास्युत्सर्गापवादभावो हलादिशेषे भ्यासस्येत्यवयवषष्ठी ईच गणइत्यत्राभ्यासस्येतिस्थानषष्ठीति भिन्नविषयावेतौ हलादिशेषोऽनवकाशत्वात्तु बाधक मीत्वं हलादिशेषस्य निरवकाशा हि विधयः सावकाशान्विधीन्बाधंत इति न्यायाघ्रयानुयेन नाप्राप्तइति न्यायस्तत्र स्यैवोत्सर्गापवादभावः॥ अभ्यासविकारेषु बाधकाइति॰ बाधकत्वमनपेक्षितनिमित्तविशेषमाश्रयणीयमित्यर्थः॥ पदयमिति॰ यथा चाकित इति ज्ञापकं तथोत्तरत्र वक्ष्यते॥ ॥दीर्घो॥ ॥नु किकृते इति॰ दीर्घश्रुत्या च्चिरिभाषोपस्था

नच सन्वद्भावमपवादत्वाद्दीर्घत्वं बाधते किं न हि परत्वात् न खल्वपिमान्मतीनां दीर्घत्वमपवादत्वादित्वं बाधते किं न धनंतरंगत्वात् न खल्वपिगणेरीत्वमपवादत्वाद्धलादिशेषं बाधते किं न र्धनवकाशत्वात् एवं तर्हीयं परिभाषा कर्त्तव्या॰ भ्यासविकारेषु बाधकानबाधंत इति॰ स्यात्तदेषा परिभाषा कर्त्तव्या न कर्त्तव्या आचार्यप्रवृत्तिर्ज्ञापयति न वसेषा परिभाषेति॰ पदयमकित इति प्रतिषेधं शास्ति॥ ॥दीर्घो॥ ॥अकित इति किमर्थं॰ यंयम्यते रंरम्यते॰ अकित इति शक्यमकर्त्तुं कस्मान्न भवति यंयम्यते रंरम्यत इति॰ नु कि कृते नजंतत्वात् अत उत्तरं पठति॰ अकिद्वचनमन्यत्र किदंतस्यागमस्य निवृत्यर्थं॰ अकिद्वचनं क्रियते ज्ञापनार्थं॰ किं ज्ञाप्यं॰ एतज्ज्ञापयत्याचार्यो, न्यत्र किदंतस्यागमस्य विधिर्न भवतीति किमेतस्य ज्ञापने प्रयोजनं॰ ह्रस्वालत्वगुणेषु ह्रस्वत्वं॰ अपचच्छतुः अपचच्छुः॥ अत्वं॰ चच्छद्तुः चच्छदुः॥ इत्वं॰ चिच्छादयिषति चिच्छिदयिषति॰ गुणः॰ चे स्याभ्यास २
नाद्यायाभ्यासस्य विशेषणं इजंतस्याभ्यासस्य दीर्घो विधीयते सचागमस्येति वचना च्छिद्यते चोच्छुद्यते नु कि कृते॰ नंत्यत्वादेते विधयो न प्राप्नुवंति॰ विप्रतिषेधाकिदं

दंतस्यागमो भवति॰ अकिद्वचनमिति॰ यद्यभ्यासो विशेष्येत अकित इति प्रतिषेधोनर्थकः स्यात् तस्मादभ्यासेनाद्विशेष्यते नतोभ्यासस्येति विशेषणषष्ठीत्यलोऽस्येति नोपतिष्ठत इति ज्ञाप्यत इत्यर्थः॥ अपचच्छतुरिति॰ छो छेदने आत्वं लिट् छाशब्दस्य द्विर्वचनमंतरंगत्वात्तु किकृते॰ नंत्यस्याप्यचो ह्रस्वत्वं॰ चच्छदतुरिति छद अपवारणे द्विर्वचनमोः छदो द्विर्वचने छे चेति तु कि कृते उरदित्व लमभ्यासेन ऋवर्णस्य विशेषणात्॰ चिच्छादयिषतीति॰ छद संवरणे॥ ॥

=अंतस्यात्यापि [illegible] नवकाशत्वापिहलादिशेषेणत्वस्य नीत्वमौव स्वः सुतः॥ अभ्यास संज्ञाप्रवृत्तिकाले [illegible] दिना ह्रस्वादित्व दितार्थमिति नात्मार्थं २=

परत्वादेते विधय इति । नैषेते प्रकृदाहरणेषु नुगं तरंगः अल्पविशेष निमित्तत्वादभ्यासस्याभ्यासाश्रयतानुगरुस्त्वादीनां । नदंताग्रहणं चेति ज्ञापकमंतरेणापि विशेषणविशेष्यभावे कामचारः तत्रापि तु केते विधयः सिध्यंति । एवं च कृतेनेति । ततश्चाकित इति वचनं दीर्घनिषेधापवज्ञापनाय । अपवादो नुगिति । नाभ्यासे दीर्घं तु क आरंभात् । एवं तर्हीति । ओहाङ् त्यागे इत्यस्य तु निषेधाय अकित इति न भवति धातुरूपं किन्न तन्न्यासः ककारो हि हस्व औ हि कालयोरि सत्र हाक् हाङोः सामान्यग्रहणार्थः ॥ ॥नुग॥ नपरकरणं न्त पूर्वस्यापि दीर्घस्य

नैतानि संति प्रयोजनानि । विप्रतिषेधेनाप्येतानि सिध्यानि । तु क्रियतामेते विधय इति किमत्र कर्त्तव्यं । परत्वादेते विधय इति । नदंताग्रहणं वा । अथवा नैवं विज्ञायते अभ्यासस्याजंतस्य ऋकारांतस्याकारांतस्येगंतस्येति । कथं तर्हि अभ्यासे यो ऋ अभ्यासे य ऋकार अभ्यासे यो ऽकारः अभ्यासे य इगिति । एवं च कृतत्वाद्दीर्घत्वं प्राप्नोति । एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति किं । अपवादो नुग्दीर्घत्वस्येति । एवं तर्हि सिद्धे सति यदकिति षेधं शास्ति तज्ज्ञापयत्याचार्यो भवत्येषा परिभाषा अभ्यासविकारेषु बाधका न बाधंत इति । किमेतस्य ज्ञापने प्रयोजनं । ऐचोर्यङि दीर्घप्रसंगो ह्रस्वाद्धि परं दीर्घत्वमिति यदुक्तं स न दोषो भवति ॥ ॥नुग॥ ॥नुकि यंयम्यते रंरम्यत इति रूपासिद्धिः । नुकि यंयम्यते रंरम्यत इति रूपं न सिध्यति अनुस्वारागमवचनात्तु सिद्धं । अनुस्वारागमो वक्तव्यः । एवमपीदमेव रूपं स्यात् यँयम्यते इदं न स्यात् यंयम्यते । पदांतवच्चेति वक्तव्यं वा पदांतस्येति ॥ ॥रीगृ॥ ॥रीगृत्वतः संयोगार्थं । रीगृत्वत इति वक्तव्यं । किं प्रयोजनं । संयोगार्थं । संयोगांताः प्रयोजयंति । वरीवृश्च्यते परीपृच्छ्यते बरीभ्रज्ज्यते ॥ ॥रुग्रि॥ मर्मृज्यते मर्मृज्यमाना स इति चोपसंख्यानं कर्त्तव्यं । मर्मृज्यते मर्मृज्यमानासः ॥ ॥ऋतश्च॥ ॥किमिदमकारग्रहणमंगविशेषणमृकारांतस्यांगस्येत्याहोस्विदभ्यासविशेषणमृकारांतस्याभ्यासस्येति । अंगविशेषणमित्याह कथं ज्ञायते ॥

निवृत्त्यर्थं तेन वा नाम्यत इति नुग्न भवति । नुकि यंयम्यत इति । अनल्परत्वादनुस्वारो न प्राप्नोति । एवमपीति । नित्यं परसवर्णः प्राप्नोति विकल्पेन चेष्यते । पदांतवच्चेति । तेन वा पदांतस्येति परसवर्णविकल्पः ॥ ॥रुग्रि॥ मर्मृज्यत इति । रुग्रिकौ च लुकीति रुग्विधीयमानो न प्राप्नोतीति वचनं ॥ ॥ऋतश्च॥ ॥अंगविशेषणमिति । यद्यभ्यासविशेषणे ऋतपूर्वे दीर्घनिवृत्त्यर्थं तपरकरणं तथापि मुख्यकल्पनासंभवे गौणीकल्पना किमित्याश्रीयत इति मत्वा भाष्यकारेणांगविशेषणमेतदित्याश्रितं ॥

भा॰कै॰
८६

पचतीति। लडुपलक्षणं। तेन चलटिचाकर्त्तीत्यादिरूपाणि किरतिं योजयेदित्यर्थः। प्रातिज्ञमिति। तपरकरणादङ्गविशेषणमत इति तेन ऋगादीनां विषयविभागेन यथा प्रातिज्ञं जानातीत्यर्थः। आरब्ध इति। संग्रहणं संग्रहः साधुशब्दराशिः स तेन आरब्ध इति योग्यतातिशयो भावनेन लक्ष्यते॥ ॥सन्वल्ल॥ ॥चङ्पर इति बहुव्रीहिणाऽन्यपदार्थो णिरभिधीयते तेनाचकमतेति केवले चङि सन्वद्भावो न भवति। नहि णिव्यतिरेकेणान्यश्चङ्परः संभवति। तेन चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्य सन्वल्ला

यदयं तपरकरणं करोति। कथं कृत्वा ज्ञापकं। नहि कश्चिदभ्यासे दीर्घोऽस्ति यदर्थं तपरकरणं क्रियते। अथाङ्गविशेषणे ऋकारग्रहणे सति त
चाकर्त्तिः परकरणे किं प्रयोजनं। इहमाभूत्। चाकीर्त्तः। चाकिरति। किरतिं चर्करीतान्तं पचतीत्यत्र यो नयेत्। प्रातिज्ञं तमहं मन्ये प्रारब्धस्तेन संग्रहः॥ यङ्लुकः संज्ञा
सन्वत्॥ ॥इह कस्मान्न भवति अजजागरत्। लघुनि चङ्पर इत्युच्यते व्यवहितं चात्र लघु चङ्परं। इहापि तर्हि न प्राप्नोति। अचीकरत्। अजी
हरत्। वचनाद्भविष्यति। इहापि वचनात्प्राप्नोति। अजजागरत्। येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्। केन च नाव्यवधानं वर्णे
नैकेन। एतेन पुनः संघातेन व्यवधानं भवति च न भवति च। एवमप्यचिक्षणदत्र न प्राप्नोति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवत्येवंजा
तीयकानामिति। यदयमत्स्मृदृत्वरप्रथम्रदस्तृस्पशामित्यत्वं शास्ति। सन्वद्भावदीर्घत्वे णिर्लुपसंख्यानं कर्त्तव्यं। वादितवन्तं प्र
योजितवान् अवीवदद्वीणां परिवादकेन। किंपुनः कारणं न सिध्यति। णिचा व्यवहितत्वात्। लोपे कृते नास्ति व्यवधानं। स्थानिवद्भावाद्व्यवधा
नमेव। प्रतिषिध्यतेऽत्र स्थानिवद्भावः दीर्घविधिं प्रति न स्थानिवदिति। एवमप्यनग्लोप इति प्रतिषेधः प्राप्नोति॥

र्यं भवति। इह कस्मादिति। न कश्चिदभ्यासो लघोरनन्तरः संभवतीति सप्तमीविज्ञानाद्व्याप्तिप्रसंग इति भावः। इतरः परसप्तम्या येन नाव्यवधानमित्याश्रीयत इति म शिवः
त्वाह। लघुनीति। एवंजातीयकानामिति। संयोगव्यवहितानामित्यर्थः। णिचाव्यवहितत्वादिति। चङ्परे णौ यल्लघु तस्मिन्परतोऽभ्यासस्य सन्वद्भावः यस्मिंश्चात्र णौ ८६
लघुनि णौ चङ्परः स लुप्तः चङ्परे न तस्मिन्परतो लघुः। दीर्घविधिं प्रतीति। न तु दीर्घे कर्त्तव्ये भवति स्थानिवत्वनिषेधः सन्वद्भावे तु प्राप्नोति स्थानिवद्भावः। एवं तर्हि दीर्घ
भाविताद्धिकारेण उपचाराद्दीर्घशब्देनोच्यते इति भाष्यकारस्याभिप्रायः। किंतु मुख्ये दीर्घे संभवति गौणग्रहणमयुक्तमिति चिंत्यमेतत्॥

=दङ्कि॰ [illegible] नत्वमनभावा द्यतदंगसंदं भ्या सलोपो लोप इ [illegible] निर्देशादिति भाष्यः। ७ =

भा॰कै॰

८७

इट्दीर्घोकृतायां लोप इति॰ एतसौ च उ इति सूत्रभाष्ये णा विरुध्यते॰ तत्र त्वगिति प्रत्याहारग्रहणसामर्थ्यादकृतायां इट्दीर्घो लोप इति प्रतिपादितं॰ मीमादीनां त्विति॰ सनिपदद्ध्यभ्यासकार्यं तदतिदिश्यते मीमादीनां च सन्यभ्यासस्य लोपो दृष्ट इति सन्वद्भावः प्राप्नोति॰ सिद्धं त्विति॰ नेह कार्यमतिदिश्यते अपि तु रूपं लोपश्चाभावः रूपं लोपो न भवती
ति नातिदिश्यते॰ किं चात्र लोपोऽभ्यासस्येत्यत्र ग्रहणं विषयावधारणार्थं तेनेसादिविषय एवाभ्यासस्य लोपो भवतीति तदभावे तु सन्वद्भावान्न भवति॰ अंगान्यत्वादि
ति॰ मीमादीनामंगानामभ्यासलोपो विहितः अयं त्वभ्यासोऽपनानामिति न लुप्यते॰ अन्ये तु व्याचक्षते॰ चङ्परे णौ यदंगं तदभ्यासस्य सन्वद्भावो विधीयते णौ मीमादी

इट्दीर्घोकृतायां लोपस्तत्रा(अ)लोप्यंगं भवति॰ एवं तर्हीदमिह संप्रधार्यं इट्दीर्घो क्रियतां लोप इति॰ किमत्र कर्तव्यं॰ परत्वादिट्दीर्घः॥ नित्यो लोपः कृतायाम
पि इट्दीर्घो प्राप्नोत्यकृतायामपि॰ लोपोऽप्यनित्यः॥ अन्यस्य कृतायां इट्दीर्घो प्राप्नोत्यन्यस्याकृतायां॰ शब्दांतरस्य च प्राप्नुवन्विधिरनित्यो भवति॰ उभयो
रनित्ययोः परत्वादिट्दीर्घः इट्दीर्घो कृतायां लोपः तन्नालोप्यंगं भवति॰ मीमादीनां तु लोपप्रसंगः॥ मीमादीनां तु लोपः प्राप्नोति॰ अमीमपत्॰ सिद्धं तु रू
पातिदेशात्॰ सिद्धमेतत्॰ कथं॰ रूपातिदेशोऽयं॰ सन्निपदादिशमभ्यारूपं तत्सन्वद्भावेनातिदिश्यते॰ न च मीमादीनां सन्यभ्यारूपमस्ति॰ अंगा
न्यत्वाद्वा सिद्धं॰ अथवा एपं तमेतदंगमन्यत्॰ लोपे कृते नान्यत्वं स्यान्निवृत्तावादंगमन्यत्॰ कथं अजिज्ञपत्॰ अत्र सन्यपि एपं तस्यैवोपा
दानमापुक्तप्रधामीदिति॰ तत्रांगान्यत्वादभ्यासलोपः स्यात्॰ तस्मात्पूर्व एव परिहारः सिद्धं तु रूपातिदेशादिति॰॥ ॥इति श्रीमद्भग
वत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकं॥ ॥पादश्च समाप्तोऽध्यायश्च॥ ॥७॥

शिवः

८७

[illegible]न्येवांगानि पुकस्तत्कृतत्वात्तद्ग्रहणेन ग्रहणं तस्मादंगान्यत्वादित्यस्यायमर्थः॥ येषामंगानामचङ्सादिर्विधीयते तदभ्यासस्याग्रहणं विषयावधारणार्थं लोपो
नान्येषामिति इसादिरहितानाममीमपदित्यादौ च धातोः सन्वद्भावादिसाधनाभावादभ्यासलोपाभावः॥ अथवा सेकारादौ सन्यभ्यासलोपो विहितो न सन्कार्ये सामान्या
तिदेशाल्लोपाभावः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे सप्तमस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकं॥ पादोऽध्यायश्च समाप्तः॥ सं॰ १८२८ आषाढ॥

तिदेशे विशेषान्

भावा२

=नन्येषामिति॰ अस्य [illegible] नमित्यादिरहितानामिति॰ २=इसाद्यभावे हेतुः॥ धातोः सन्वद्भावादिति [illegible] कार्यं [illegible] विषयत्वात्तस्येति भावः॥ २= सः श्रीमन्नुवर्त्तनात्॥ २=



